तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

नाडीरनुक्रम्य, तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवतीति, तथा प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति श्रूयते । तत्र स्वप्नवत् प्रपञ्चसृष्टिमपि भगवान् मायिकीं करोति, न वेति संशयः । तत्र, एष सुप्तेषु जागर्तीत्यत्र जीवस्वापमात्रे भगवत्सृष्टेः कथनात्, स्वप्नं न कञ्चन पश्यतीत्यत्र दर्शनमात्रनिषेधान्न बाह्यं किञ्चन वेद नान्तरमिति जागरणस्वप्नप्रपञ्चयोरविशेषेणादर्शनकथनात् सुषुप्तावपि प्रपञ्चनिर्माणसम्भवान्मुक्तावपि तत् स्यात् । परं सुषुप्तावित्राज्ञानमात्रम् । तथा सति सुषुप्तिवत् पुनर्बन्धप्रसङ्ग इति प्राप्ते, उच्यते । नाडीष्वात्मनि च तस्य स्वप्नस्याभावः । कुतः ? तच्छ्रुतेः प्रपञ्चाभावश्रुतेः । कामनया हि प्रपञ्चनिर्माणम् । सुषुप्तेस्तु तद्वा अस्यैतदात्मकाममित्यादिनाऽकामरूपश्रवणात् । तत्र तन्न सम्भवतीत्यर्थः । नाडीष्वात्मनि चेतिकथनात् सुषुप्तेर्द्विरूपत्वं सूच्यते । अत एव बृहदारण्यकषष्ठे, ता वा अस्यैता हिता नाड्य., तद्वा अस्यैतदात्मकाममिति भेदेन सुषुप्तिमाह । अतः सुषुप्तौ प्रपञ्चसृष्टेरभावान्न सर्वदा प्रपञ्चनिर्माणम् । तेन नोक्तदोष. ॥ ७ ॥

प्रबोधो विचार्यते । तत्र नाडीभ्यो भगवतो वा हृदयदेशं समागत्य जागर्ति, उत यत्र स्थितस्तत एवेति संशये, प्रतियोन्याद्रवति बुद्धान्तायैवेतिब्रह्मप्रकरणीयश्रुतेर्हृदयदेशमागत्य जागर्तीति प्राप्ते, उच्यते ।

अतः प्रबोधोऽस्मात् ॥ ८ ॥

नाडीषु सुप्तौ,अतो नाडीभ्य एव प्रबोधः । प्रतियोन्याद्रवणश्रुतिस्तु ब्रह्मप्रकरणीयत्वाद् भगवतः प्रबोधव्यवस्थामाह । तस्माद् यत्र स्थितस्तत एव प्रबोध इति सिद्धम् ॥ ८ ॥

ननु प्रिययेव प्राज्ञेनात्मना परिष्वक्तस्य प्रबोधेन ज्ञाते जाते मुक्तिरेवस्यान्न पुनरागमनम् । देहनिर्वाहार्थं तु भगवदिच्छयाऽन्यो जीवः समायाति । नाडीभ्यः प्रबोधे तु मुक्त्यसम्भवात् स एव जीवः समायाति । तथाच भगवति सुप्तस्य तत एव मुक्त्यसम्भवान्मोक्षार्थं प्रयत्नो व्यर्थं इत्याशङ्का परिहरति ।

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

तुः शङ्कानिरासे। भगवतः प्रबोधे स एव। कुतः? कर्मानुस्मृतिशब्दविधिभ्यः। सामिकृतस्य लौकिककर्मणः समापनं दृश्यते। अतः स एवेति जानीमः। अनुस्मृतिरप्यनुभवितुरेव नान्यस्य सम्भवति। शब्दश्च पुण्यो वै पुण्येन कर्मणेत्यादिः। विधयश्च, श्वोभूते ब्रह्माणं वृणीत इत्याद्या अन्यस्यानुपपद्यमानाः स एवेति ज्ञापयन्ति। अतः पूर्वपक्षयुक्तीनां दुर्बलत्वात् स एव प्रतिबुध्यत इति सिद्धम् ॥९॥

ननु यत्र कर्मानुस्मृत्यादिहेतवो न सम्भवन्ति मुग्धादिषु तत्र स एवेत्यत्र नियामकाभावादन्यो भविष्यतीत्याशङ्क्य परिहरति।

मुग्धेऽर्द्धसम्पत्तिः परिशेषात् ॥ १० ॥

मुग्धे मुग्धभावे अर्द्धसम्पत्तिरेव, न सर्वा। मुग्धस्य यागाद्यनधिकारात्। लौकिकव्यवहारस्याप्यपूर्वस्यासाधनत्वाज्जीवनाधिकारप्राप्तकर्ममात्रकरणादर्द्धसम्पत्तिरेव ज्ञेया। परिशेषात्। स एव वा, न वेतिनिश्चयप्रमाणाभावात् सन्देहोऽवशिष्यते। अत्र जीवावस्थानामेव विचार्यत्वात् प्राणायतनविघातकृता मूर्च्छा नेह विचार्यते। अत एक एव जीवः स्वप्नादिदोषसम्बन्धरहितः पञ्चाग्निसाधितदेहयुक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति सिद्धम् ॥ १० ॥

अथवा ज्ञानविषयनिर्णयाय ब्रह्मस्वरूपं विचार्यते। तत्र प्रथममन्योऽन्यं विरुद्धवाक्यानां निर्णयः क्रियते। तत्र पूर्वाध्यायद्वयेन समन्वयविरोधः परिहृतः। तथा ब्रह्मणि धर्मविरोधः परिहर्तव्यः अन्यथा वेदान्तानामबोधकत्वं प्रसज्ज्येत। तत्र विरुद्धानां स्वगतधर्माणामस्मिन् पादे विचारः। जडजीवधर्मत्वेन प्रतीतास्त्वत्र विचार्यन्ते। तत्र क्वचिज्जडजीवधर्मा भगवति बोध्यन्ते, सर्वकर्मा सर्वकाम इत्यादिना। क्वचित्त्वस्थूलादिवाक्ये प्रापञ्चिकधर्मा निषिद्ध्यन्ते। नच सर्वकामादयो जीवधर्मा नेति वाच्यम्। तेषां जीवगतत्वेन प्रतीतेः। नच ते धर्माः कारणत्वेन ब्रह्मणि सन्तीति वाच्यम्। नेतरोऽनुपपत्तेरित्यादिना सर्वत्र जीववैलक्षण्यस्योक्तत्वाद् ब्रह्मणि तद्धर्माणां निषेधाच्च। एवं वेदान्तेषु वाक्यानां परस्परविरोधे प्राप्ते केषां चिन्मतेनाविरोधमाशङ्क्य परिहरति।

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥११॥

सर्वत्र कारणत्वेन भगवतो विद्यमानत्वादस्थूलेऽस्थूलोऽनणा-वनणुरुच्चावचकर्तर्युच्चावचकर्ता उच्चावचकामे उच्चावचकामः पृथिव्यां गन्धो जलादावगन्धः । एवं स्थानतः परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते । अपिशब्देनावच्छेदभेदेनाचिन्त्यसामर्थ्याद्वोभयलिङ्गत्वं सम्भवतीति संगृह्यते । तत्र, कुतः ? सर्वत्र हि । सर्वत्रैव हि ब्रह्मवाक्येष्वेतादृशमेव ब्रह्मस्वरूपं निरूप्यते । अतः स्थानभेदेनोभयवाक्यसमाधानं न सम्भवतीत्यर्थः । ब्रह्मवाक्यानामनुवादकत्वे वैयर्थ्यात् स्वरूपप्रतिपादकत्वं युक्तमिति हिशब्दार्थः । अचिन्त्यसामर्थ्याङ्गीकारे ज्ञानानुदयप्रसङ्गः । अत एतन्मतानुसारेण स्थानत उभयलिङ्गवाक्यानां विरोधो न परिहर्तुं शक्यः ॥ ११ ॥

प्रकारान्तरेणाविरोधमाशङ्क्य परिहरति ।

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

भेदात् प्रपञ्चधर्मविशिष्टं ब्रह्म भिन्नं तद्धर्माभावविशिष्टं च भिन्नमिति सर्वत्र कारणकार्येषु भेदाङ्गीकाराच्च पूर्वोक्तो विरोध इति चेन्न । मधुब्राह्मणे, अयमेव स योऽयमिति प्रत्येकमभेदवचनात्तेनाऽपि प्रकारेण विरोधपरिहारः ॥ १२ ॥

अपि चैवमेके ॥ १३ ॥

एके शाखिन एवं भेदनिषेधेनाभेदमेव वदन्ति । नेह नानाऽस्ति किञ्चन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति । अत्रेवशब्दो बहुस्यामितीच्छया प्रतीतस्य भेदस्य व्यावृत्त्यर्थः ॥ १३ ॥

अतो भेददर्शनस्य प्रत्युत निषिद्धत्वात् तदङ्गीकारेण विरोधपरिहारासम्भवादुपनिषद्वाक्येषु परस्परं विरोधे प्राप्ते, एकदेशिमतेन परिहारमुच्यते ।

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं, तद्युक्तं रूपवज्जगत् । ब्रह्म तु तद्विलक्षणम् । ननु जगतः कार्यत्वात्

कार्यकारणयोरवैलक्षण्यमपि स्यादित्याशङ्क्याह । तत्प्रधानत्वाद् ब्रह्मस्वरूपप्रतिपादकवाक्येषु ब्रह्मणः प्रधानत्वान्मुख्यत्वात् तस्यैव निरूपणमुचितं, न तु जगतोऽपि । अतो ब्रह्मणो जगद्विलक्षणत्वात्तद्धर्माणां निषेध उचितः । सर्वकर्मादयस्तु जगद्धर्मा उपचारादुच्यन्ते । अत्रारूपमितिवक्तव्येऽरूपवदिति भिन्नयत्कथनं सर्वकर्मादीनां जगद्धर्माणामेवैवं निर्णयो, न तु प्रशासनाद्यसाधारणधर्माणाम् । तेषां भगवद्धर्मत्वे विरोधाभावात् । अतः प्रपञ्चवत्तद्धर्माणामपि कार्यत्वाद्भगवत्त्व, न भगवद्धर्मत्वमिति । एवं ब्रह्मस्वरूपनिरूपकवाक्यानां मुख्यतया तन्निरूपकत्वं धर्मप्रतिपादकानां तूपचारेण तन्निरूपकत्वमित्यं कर्त्रैधिमतेन विरोधपरिहारः ॥ १४ ॥

नन्वेवं निर्धर्मके ब्रह्मणि सर्वव्यवहाराभावे शास्त्रवैफल्यं, तं त्वौपनिषदं पुरुषं पृच्छामि, यतो वाचो निवर्तन्त इति वाक्यानां विरोधश्चेत्याशङ्क्याह ।

प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

यथा सौरः प्रकाशो व्यवहार्योऽव्यवहार्यश्च स्वतः स्थापयितुं सम्पादयितुं च न शक्यते । सूर्योदये मेघाद्यभावे च व्यवहर्तुं शक्यते । तथा ब्रह्मापि लौकिकेन्द्रियैर्व्यवहर्तुं न शक्यते । भगवत्कृपया तत्सन्निधाने तु व्यवहर्तुं शक्यते । उभयथा श्रुतिर्निरूपयतीत्यर्थः । कथमेतज्ज्ञायते, तत्राह । अवैयर्थ्यात् । अन्यथा ब्रह्मप्रतिपादकं शास्त्रं व्यर्थं स्यात् । चकारेण, आसीनो दूरं व्रजति, अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः इत्यादीनामलौकिकभगवद्धर्माणामकार्याणां चात्र सिद्धानां विरोधो नास्तीत्युच्यते । तस्माद्व्यवहार्येऽपि ब्रह्मणि न शास्त्रवैफल्यम् ॥ १५ ॥

ननु मुमुक्षुकानां दर्शनश्रवणादिधर्माणामकार्यत्वकल्पनापेक्षायामलौकिकानीन्द्रियाणि कल्पनीयानि । तथा सत्यकारणकार्यत्वपरिहारेऽपि पश्यत्यचक्षुरिति श्रुतिविरोध इत्याशङ्क्य परिहरति ।

आह च तन्मात्रम् ॥ १६ ॥

यथा सैन्धवघनोऽनन्तरोऽबाह्य इत्यादिना श्रुतिस्तन्मात्रं प्रज्ञानघनमात्रमाह । अतः स्वरूपातिरिक्तेन्द्रियाणामभावाद् वेदान्तनिःश्वा-

स्वसमुत्थानादिक्रियाणामपि तत एव सम्भवात् सर्वाकारस्वरूपात्मकत्वस्याङ्गीकारान्नेन्द्रियादिकल्पनया श्रुतिविरोधः शङ्क्यः। चकारेण, सर्वेन्द्रियविवर्जितमिति स्मृतिरपि संगृहीता ॥ १६ ॥

ननु ब्रह्मणः समवायिनिमित्तरूपेण जगत्कारणत्वात् कारणधर्माणामेव कार्ये दर्शनात् कामादिधर्माणां च श्रुत्योक्तत्वाद् ब्रह्मणि सत्त्वमङ्गीकर्तव्यम्। तथाच निषेधकश्रुतिविरोध इति प्रकारान्तरेणाशङ्क्य परिहरति।

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

दर्शयति श्रुतिरेव, अथात आदेशो नेति नेतीत्यादिना ब्रह्मणि जडजीवधर्माणामभाव इति। अग्रे, अन्यत्परमस्तीत्यनेन ब्रह्मणः प्रपञ्चातिरिक्तकथनात् प्रपञ्चधर्माणां तत्र कथनमौपचारिकमेव युक्तम्। श्रुतेरन्यार्थत्वनिराकरणाय स्मृतिसम्मतिमाह। अनादिमत्परं ब्रह्मेत्यादि स्मर्यतेऽपीत्यर्थः। अतः प्रपञ्चधर्माणामुपचाराद् ब्रह्मणि कथनं युक्तम् ॥ १७ ॥

अत्रैव निदर्शनमाह।

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

अत एवेमं निर्णयमाश्रित्य, समः प्लुषिणा समो नागेन समो मशकेन सम एभिस्त्रिभिर्लोकैरित्यादिना निरुपमस्य भगवत उपमाकथनम्। नह्येतत् तत्तद्धर्मसम्बन्धं विनोपपद्यते। स्वतन्त्रतादशाधर्मवत्त्वस्य ब्रह्मणि वक्तुमयुक्तत्वात्। नन्विदमपि विरुद्धमित्याशङ्क्य दृष्टान्तेन समाधत्ते। सूर्यकादिवत्। सूर्येण सहितं कं जलं सूर्यकम्। यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्, एकधा दशधा चैव दृश्यते जलचन्द्रवदित्यत्र प्रतिबिम्बसहितस्य जलस्योपमानत्वम्। तथा, समः प्लुषिणेत्याद्यपि भगवतः सर्वकारणत्वेन तत्तद्धर्मसम्बन्धाद् बोध्यं, नतु स्वातन्त्र्येण भगवति ते धर्माः सम्भवन्ति। चकारस्त्वेवं विरोधाभावो वाच्योऽधिकरणं चैकदेशिनः सम्पूर्णमिति बोधनार्थः ॥ १८ ॥

अतो जडजीवधर्माणां भगवत्युपचारात् कथनं, निषेधस्तु मुख्य इत्येकदेशिमतं दूषयति।

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९॥

तुः पूर्वमतव्यावृत्त्यर्थः। न तथात्वं, ब्रह्मण उपचारेण जडजीवसम्बन्धात् सर्वकामत्वादिकं न सम्भवति। कुतः? अम्बुवदग्रहणात्। यथा स्वच्छमम्बु प्रतिबिम्बं गृह्णाति, तथा धर्माः सर्वकामत्वादयो धर्मिणं भगवन्तं न गृह्णन्ति। स्वातन्त्र्यपरत्या धर्मव्याघातात्। सर्वाधारत्वेन ब्रह्मणस्तद्धर्मवत्त्वं तु स्वाभ्युपगमविरुद्धम्। नच वेदे भ्रमाद्धर्मकल्पनं सम्भवति। अप्रतारकत्वात् सर्वज्ञत्वाच्च। अतः सर्वकामादयो ब्रह्मधर्माः स्वाभाविका एव, नतूपाधिसम्बन्धादौपचारिकाः॥ १९॥

सिद्धान्तेन विरोधं परिहरति।

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २०॥

यथैकस्यैवाकाशस्य करकादिष्वन्तर्भावाद् वृद्धिह्रासभाक्त्वमेवमेवोभयसामञ्जस्याद् एवं तत्तदनुप्रवेशाद् ब्रह्मणोऽपि सर्वकामादयः सम्भवन्ति। नचैवं धर्माणामौपाधिकत्वप्रसङ्गः। जपाकुसुमलौहित्यवदन्यधर्मत्वाभावाद् ब्रह्मधर्माणामेवान्यत्र प्रतिभानात्॥२०॥

अत्र हेत्वन्तरमाह।

दर्शनाच्च॥ २१॥

भगवति सर्वे विरुद्धा धर्मा दृश्यन्ते, अल्पपरिमाणं, महत्परिमाणम्। एवं बाल्यकिशोरावस्थास्वपि ज्ञेयम्। नहि दृष्टेऽनुपपन्नं नाम, व्याघातात्। चकारेणोलूखलबन्धनादौ प्रत्यक्षेणैवोभयधर्मवत्त्वेन दर्शनं संगृह्यते। अनन्तब्रह्मत्वेनाद्दशामिति मन्तव्यम्। नतः श्रुतिस्मृतिप्रत्यक्षैः सर्वविरुद्धधर्माश्रयत्वेन ब्रह्मप्रतीतेर्न कश्चिद् विरोधः शङ्क्यः॥ २१॥

एवं वस्तुस्वरूपविचारेण परमार्थतो विरोधं परिहृत्य युक्त्या परिहरति।

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति

च भूयः ॥ २२ ॥

प्रकृतं यदेतावत्त्वं प्राकृतधर्मवत्त्वं तदेव प्रतिषेधति. श्रुतिः, न त्वलौकिकसर्वकामवत्त्वादिकम् । प्रतीतस्यैव प्रतिषेध्यत्वादप्रतीतस्य चालौकिकधर्मवत्त्वस्य प्रतिषेधायोगात् । अस्थूलादिवाक्यैर्ब्रह्मणो अगद्वैलक्षण्यमेवोच्यते । ननु चेद्दोक्तधर्मा निषिध्यन्ते । अत्र प्रमाणमाह । ततो ब्रवीतीत्यादि । यत्र वाक्ये धर्मान् निषेधति, पुनस्तत्रैव तान् विधत्ते, यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वानित्यादौ । तस्माल्लौकिकधर्माणामेव प्रतिषेधो, न त्वलौकिकानामपीति ज्ञेयम् ॥ २२ ॥

एवं शब्दबलविचारेण विरोधं परिहृत्यार्थबलविचारेण तत्परिहारायाधिकरणान्तरमारचयति । तत्र, न चक्षुषा गृह्यते, कश्चिद्धीरः प्रत्यगात्मानमैक्षत, नापि वाचा, सर्वे वेदा यत्पदमामनन्ति, अस्पर्शमगन्धमरसं, सर्वरूपः सर्वगन्धः सर्वरस इत्यादिविरुद्धवाक्यानां दर्शनाद् वस्तुनो द्वैरूप्यासम्भवात् स्वतःप्रमाणभूतवाक्यद्वये एकस्य प्रामाण्यमन्यस्योपचरितार्थत्वं कल्प्यम् । तत्र कस्योपचरितार्थत्वमितिजिज्ञासायां प्रत्यक्षानुरोधेन पूर्वपक्षमाह ।

तदव्यक्तमाह हि ॥ २३ ॥

तद् ब्रह्माव्यक्तमेव भवितुमर्हति । यतः, आह हि श्रुतिप्रत्यक्षाभ्याम् । नेति नेतीत्यात्माऽग्राह्यो नहि गृह्यत इति । न हि गृह्यत इत्यनुभवं श्रुतिराह । नहि चक्षुषा वा मनसा वा कस्यापि दर्शनमस्ति । सर्वरूपत्वे तु ब्रह्मणः सर्वेषां दर्शनं स्यात् । अतो धर्मप्रतिपादकानि वाक्यान्युपचरितार्थान्येवेति प्राप्ते ॥ २३ ॥

उच्यते ।

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

अपिः पूर्वपक्षिगर्हणे, यतोऽसौ मूर्खः।संराधने नवधाप्रकारकसेवायां भगवत्तोषे जाते द्रष्टुं शक्यते । श्रद्धाभक्तिध्यानयोगादवेहि, भक्त्या त्वनन्यया शक्य इत्यादि, ज्ञातुं द्रष्टुं च तत्त्वेनेत्युक्तेः । किञ्च, ततस्तु तं पश्यते निष्कलं ध्यायमानः, अनेकधाद्भुदरवक्त्रनेत्रं पश्या-

मीत्यादिना सगुणनिर्गुणं च रूपं दृश्यत्वेनोच्यते । अतः प्रत्यक्षानुमानाभ्यां संराधकस्य स्वानुभवो, ध्रुवादीनामनुमापकत्वात् तज्ज्ञानमनुमानं ताभ्यां, श्रुतिस्मृतिभ्यां वा ब्रह्म साकारमनन्तगुणपूर्णं चेति, नाव्यक्तमिति ज्ञेयम् ॥ २४ ॥

इममेव सिद्धान्तं प्रकारान्तरेण स्थिरीकर्तुमधिकरणान्तरमारचयति । तत्र सूत्रद्वयेन पूर्वपक्षद्वयमाह ।

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥

ननु प्रत्यक्षानुरोधेन ब्रह्मण उभयरूपत्वं न सम्भवति । अतस्तत्प्रतिपादकवाक्यानां वस्तुशक्त्या निर्णय उचितः । तत्र यथा प्रकाशजलसुवर्णानां सूर्यचन्द्रमणिप्रकाशादिषु हिमतप्तकुण्डादिजलेषु सुवर्णे चानेकविधरूपस्य दृश्यमानत्वेऽपि नानेकविधत्वमङ्गीक्रियते, एकरूपत्वेनैव तेषां निर्णयात् । तथा ब्रह्मणोऽप्यवैशेष्यमङ्गीकर्तव्यम् । ननु साक्षात्कारानुरोधेन ब्रह्मणि तावन्तो धर्मा अङ्गीक्रियन्त इत्याशङ्क्याह । प्रकाशश्च कर्मणि । भगवतः प्रकाशस्तु तपःप्रणिधानादिकर्मणि भवति । तत्र तु भक्तेच्छानुरोधाद् यथाकामं प्रकटीभवतीति स प्रकाशो वस्तुनिर्णायको न भवतीत्यर्थः । चकारेणाप्रकाशान्यथा प्रकाशश्च भवति, तदप्यभ्यासात् । बहुवारमनेकरूपेण प्रकटीभवति । अतोऽनेकरूपदर्शने न वस्तुनिर्णायक भवतीति भावः ॥ २५ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥

अतोऽभ्यासादनन्तेन रूपेणाविर्भावः । नह्येक वस्तु स्वतोऽनेकविधं भवति । तथा सति लिङ्गं विग्रह एव भवति, न स्वरूपम् । हीत्यनेन, यद्धियात उरुगाय विभावयन्तीति प्रमाणं सूचितम् । अतः श्रुतेः प्रत्यक्षस्य वा निर्णायकत्वान्निर्द्धर्मकमेव ब्रह्मेति प्राप्ते ॥२६॥

उच्यते ।

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

तुः पक्षव्यावर्तकः । नहि ब्रह्मस्वरूपनिर्णयो युक्त्या कर्तुं शक्यः । शब्दैकगम्यस्य ब्रह्मणः स्वरूपनिर्णयः शब्देनैव भवति । अत उभयव्यपदेशाद् निर्गुणत्वेनानन्तगुणत्वेन सर्वविरुद्धधर्माश्रयत्वेन व्यपदेशादुभयरूपं ब्रह्म ज्ञेयम् । तदुभयमपि वास्तविकं नित्यम् । गुणानामपि तदात्मकत्वेन निर्गुणत्वम् । आश्रयाश्रयिभावरूपेण स्फुरणात् सविशेषमपि । नन्वेकस्य कथमनेकधा भानं, तत्राह । अहिकुण्डलवत् । यथैक एव सर्प ऋजुरनेकाकारः कुण्डलश्च भवति, तथा ब्रह्माप्यचिन्त्यशक्त्या सर्वप्रकारं भक्तेच्छया तथा स्फुरति । अतः प्रमाणसिद्धसकलविरुद्धधर्माश्रये भगवति, न क्वापि श्रुतिरुपचरितार्थेति सिद्धम् ॥ २७ ॥

एवं धर्मिस्वरूपविचारेण ब्रह्मणो निर्धर्मकत्वं सधर्मकत्वं च स्थापयित्वा धर्मस्वरूपविचारेणेदमेव स्थापयितुमधिकरणान्तरमाह । तत्र धर्माः किं ब्रह्मणो भिन्नास्तत्कार्यरूपा उत ब्रह्मैवेति संशये, लोके कार्यस्यैव घटरूपादेस्तद्धर्मत्वव्यपदेशात् तन्नित्यतायां प्रमाणाभावात् स्वाभाविकत्वेन नित्यत्वोक्तौ, एकमेवाद्वितीयमिति श्रुतिविरोधाच्च धर्माः प्रपञ्चवत् कार्याः, तथा च ब्रह्म निर्धर्मकमेवेति प्राप्ते, उच्यते ।

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

वाशब्दः पूर्वपक्षव्यावर्तकः । यथा प्रकाशाश्रयाः सूर्यादयः प्रकाशेन न भिन्नाः पृथक्स्थित्यभावात् । नापि प्रकाशः सूर्य एव । सूर्यस्य प्रकाशभेदेन प्रतीतेः । अनन्तरूपत्वेनादृशामिति मन्तव्यम् । तत्र हेतुः । तेजस्त्वात् तेजःशब्दवाच्यत्वाद्, अथ यदतः परो दिवो ज्योतिरित्यादिना । अतो ब्रह्मधर्माणामपि चिद्रूपत्वेन स्वरूपानतिरेकान्न कार्यत्वेनानित्यत्वमिति ज्ञेयम् । तस्माद् यथाश्रुतमेव ब्रह्म सधर्मकं निर्धर्मकं चेति सिद्धम् ॥ २८ ॥

पूर्वोक्तैकदेशिमतेनाप्युभयवाक्यसमाधानमाह ।

पूर्ववद्वा ॥ २९ ॥

अथवा, अरूपवदेव हीत्यादिपञ्चसूत्र्या यः पूर्वमेकदेशिमतेन सिद्धान्त उक्तो, निर्धर्मकमेव ब्रह्म सर्वकामादिधर्मनिरूपणं तूपचारादिति तद्वद्वा ब्रह्म ज्ञेयम् । अयमाशयः । उपपत्त्योपपत्त्या च द्वेधा ब्रह्मस्वरूपविचारः । तत्र सिद्धान्तिमतेनोपपत्त्या विचारे धर्मिग्राहक-

प्रमाणभूतैरुपनिषद्वाक्यैर्यादृशं ब्रह्म बोध्यते सधर्मकं निर्द्धर्मकं च तादृशमेव तद्वस्तूपपद्यते । अन्यथाकल्पनस्य कल्पनामात्रत्वात् । एकदेशिमतेन तूत्पत्त्या विचारे प्रथमं ब्रह्म निर्द्धर्मकमेव । ततो, बहु स्यामितिसृष्टीच्छया प्रथमं ब्रह्म स्वधर्मरूपेण भवति । ततः क्रियादिरूपेण प्रपञ्चरूपेण चेति । अनया रीत्याऽपि ब्रह्मस्वरूपमुभयात्मकं सिद्ध्यति । अन्यथैकतरश्रुतिबाधः स्यात् । धर्माणां नित्यत्वं तु ब्रह्मात्मकत्वादेव ज्ञेयम् । अयं भावः । निर्गुणमेव ब्रह्माङ्गीकर्तव्यम् । अत्र न विवदामः । किन्तु केवलनिर्गुणत्वे सृष्टिप्रक्रियाबन्धमोक्षव्यवस्थादीनामनुपपत्तिरस्ति । ननु प्रतिबिम्बेनैव समाधेयमिति चेदुच्यते । नहि निर्द्धर्मकस्य प्रतिबिम्बं सम्भवति । लोके कुत्रापि तथाऽदर्शनात् । तस्मादचिन्त्यतद्भिन्नशक्त्या सगुणमपि स्वरूपं वास्तविकमेवाङ्गीकर्तव्यम् । तदेव सृष्टिसमये गुणानाविष्कृत्य सृष्टिं करोति । ननु सधर्मकत्वे, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्गः स्यादिति चेदुच्यते । गुणाः स्वस्वरूपान्नात्यन्तं भिन्नाः । तस्मात् तेषामपि तत्स्वरूपत्वेनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञापि सुस्थैव । अतो न कोऽपि दोषः शङ्क्यः । मतद्वयमपि सूत्रकारस्सम्मतमित्युपन्यस्तम् ॥ २९ ॥

एकदेशिमते उपपत्त्यन्तरमाह ।

प्रतिषेधाच्च ॥ ३० ॥

एकमेवाद्वितीयं ब्रह्मेतिश्रुतावेकमेवेत्येवकारेणान्यनिषेधप्राप्ताबद्वितीयमितिप्रतिषेधाद्धर्मप्रतिषेधोऽपि गम्यते । येनेतिकथनाद्धर्माणां पुनरभिव्यक्तिः । एवकारेणैकब्रह्मविज्ञानेन सर्वविज्ञानप्रतिज्ञा संगृहीता । अतो ब्रह्मणि न कोऽपि विरोधोऽस्तीति सिद्धम् ॥ ३० ॥

एवं धर्मधर्मिविरोधं परिहृत्य ब्रह्मणो धर्म्यन्तरपरिहारायाधिकरणान्तरमारभते । तत्र पूर्वपक्षः ।

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

अतो ब्रह्मणोऽपि परम् अन्यद्वस्त्वस्ति । तत्र चत्वारो वैदिकहेतवः । अथ य आत्मा स सेतुर्विधृतिरिति सेतुव्यपदेशः । तत्र पारान्तरत्वार्थं सेतुव्यपदेशात् तस्मादन्यत् प्राप्यमेव कल्प्यात् फलात्मकमन्यत् किञ्चिद्भवतीति प्रापणेः तथा, पापान् पापमाकाशमाया-

नैषोऽन्तर्हृदय आकाश इत्युन्मानव्यपदेशः। तेन परिच्छेदो निरूपितः। तथा, उभावस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्याधाराधेयसम्बन्धो निरूपितः। तथा, य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, य एषोऽन्तरक्षिणि पुरुषो दृश्यत इत्यत्रादित्याक्षिस्थितयोः पुरुषयोः परस्परं धर्मातिदेश उक्तो धर्मिभेद एव सम्भवति। धर्म्यैक्ये तु स एवायमित्युच्येत। अतोऽस्य देशकालवस्तुस्वरूपपरिच्छेदाच्चतुर्विधपरिच्छेदरहितं फलरूपमन्यत् किञ्चिदस्तीति प्राप्ते ॥ ३१ ॥

उच्यते।

सामान्यात्तु ॥ ३२ ॥

तुः पक्षव्यावर्तकः। ब्रह्मणि संसारसागरोत्तरणोपायत्वसामान्यात् सेतुव्यपदेशः। निर्लेपायाकाशव्यपदेशः। कामादिविमोहाय चतुष्पात्त्वमुक्तम्। अमृतत्वाय षोडशकलत्वं निरूपितम्। अतुलत्वाय सम्बन्धकथनम्। दिव्यत्वज्ञापनायाक्षिस्थिते आदित्यधर्मातिदेशः। अतो गुणार्थमेव सेतुत्वादिवचनं, न तु तद्गतदोषार्थम्। अतो नातः परमन्यदस्तीति मन्तव्यम् ॥ ३२ ॥

तर्ह्यन्यसमानत्वेन कथनं किमर्थमित्याशङ्क्याह।

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

तथा व्यपदेशो बुद्ध्यर्थो ज्ञानार्थः। तथोपासनार्थमित्यर्थः। अयुक्तत्वमाशङ्क्य दृष्टान्तमाह। पादवदिति। यथा भूतादीनां पादत्वज्ञानमुपासनार्थं तथेदमपीत्यर्थः ॥ ३३ ॥

ननु स एवायमित्यतिदेशेऽप्यक्षिस्थितस्य दिव्यत्वसिद्धौ धर्मातिदेशस्य वैयर्थ्यमित्याशङ्क्य, तयोक्तौ समानधर्मज्ञानं न स्यादित्यत्र हेतुमाह।

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

यथा, यदादित्यगतं तेज इतिवाक्यादादित्यचन्द्राग्निगततेजसामैक्ये स्थानभेदात् समानधर्मवत्त्वं नास्ति, तथा प्रकृते तयोक्तौ दिव्यस्थितावपि धर्मभेदः स्यादतो धर्मातिदेशः। आदिपदाद् यथैकस्यैव कालस्योपाधिविशेषसम्बन्धादुत्तरायणादिरूपधर्मपरत्वं, दक्षि-

मायनाद्यपकृष्टधर्मवत्त्वं, तथैत्यपि दृष्टान्तः संगृह्यते॥ ३४॥
किञ्च।

उपपत्तेश्च॥ ३५॥

ब्रह्मणः परस्य निखिलप्रमाणविरोधादनुपपत्त्या ब्रह्मैव परमकाष्ठापन्नं फलरूपं चेत्युपपन्नमित्यर्थः॥ ३५॥

तथाऽन्यप्रतिषेधात्॥ ३६॥

न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुत्वाऽन्यप्रतिषेधादन्यकल्पना निर्मूला। सेतुत्वादिकथनं तूक्तमेव॥ ३६॥
अथ प्रकरणमुपसंहरन् फलितार्थमाह।

अनेन सर्वगतत्वमायामशब्दादिभ्यः॥ ३७॥

अनेन ब्रह्मणोऽन्यस्य परत्वनिरासेन, आयामशब्दादिभ्यः, आकाशवत् सर्वगतश्च नित्यः, ज्यायान् दिवो ज्यायानाकाशात् तेनेदं पूर्णं पुरुषेण सर्वं, सर्वतःपाणिपादमित्यादिव्यापकत्ववाचकश्रुतिस्मृतिवाक्येभ्यः साक्षात्सर्वगतप्रतिपादकेभ्य एव सर्वगतत्वं सिद्ध्यति, न तु काणादानामिव कर्तृत्वाद्यनुपपत्त्येत्यर्थः। तस्माद् ब्रह्मणि श्रुतिरेव प्रमाणमन्यत्त्वभ्युच्चयमात्रपर्यवसन्नं, सिद्धसाधनत्वादिति भावः॥ ३७॥

एवं भगवतः सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपमुक्त्वा फलेप्सूनां भजनप्रयोजकं फलदातृरूपं निरूपयति।

फलमत उपपत्तेः॥ ३८॥

अत ईश्वरादैहिकं पारलौकिकं वा फलं भवति। उपपत्तेः, सर्वस्य वशी सर्वस्येशान इति श्रुतौ वस्तुमात्रेशितृत्वोक्त्या तस्य फलदातृत्वोक्तेः। अन्यस्य स्वन्यदीयपदार्थदाने सामर्थ्यासम्भवान्न, दातृत्वं सम्भवतीति भावः॥ ३८॥

श्रुतत्वाच्च॥ ३९॥

स वा एष महानज आत्माऽन्नादो वसुदान इत्यादिश्रुतौ,

चकारेण, सुखं दुःखं भवो भाव इत्यारभ्य, भवन्ति भावा भूतानां मत्त एव पृथग्विधा इति स्मृतौ भगवतः सर्वफलदातृत्वं श्रूयतेऽपीत्यर्थः ॥ ३९ ॥

अत्र कर्मवादी प्रत्यवतिष्ठते ।

धर्मं जैमिनिरत एव ॥ ४० ॥

अत एव, श्रुतेर्न्यायादिहेतोरुपपत्तेश्च जैमिनिः कर्मवादी धर्मं यागादिकं फलदातृत्वेन मनुते । अयं भावः । कर्मणः फलदातृपक्षेऽप्युपपत्तिश्रुती तुल्ये । एवञ्च भगवतोऽपि फलादिदाने कर्मसापेक्षत्वे असमर्थत्वम् । नैरपेक्ष्ये तु कर्मविधिवैयर्थ्यं, वैषम्यनैर्घृण्यप्रसक्तिश्च । अतः कर्मणैव फलम् । ईश्वरस्य फलदातृत्वबोधकवाक्यानि त्वर्थवादत्वेन नेयानीति प्राप्ते ॥ ४० ॥

उच्यते ।

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुः पूर्वपक्षनिरासे । बादरायण आचार्य इतः पूर्वमुक्तमीश्वरमेव फलदातृत्वेन मनुते । कुतः? हेतुव्यपदेशात् । एष एव साधु कर्म कारयतीति श्रुतौ फलदानेच्छयेश्वरस्यैव कर्मकारणे हेतुत्वेन कथनात् । वैषम्यनैर्घृण्यदोषस्त्वात्मस्पृहया परिहरणीयः । कर्मद्वारा फलदानान्न कर्मविधिवैयर्थ्यम् । ननु स्वतः फलदानसमर्थस्येश्वरस्य फलार्थं कर्मकारणे को हेतुः, कार्यवैचित्र्यं च कथमित्याद्याशङ्का तु, कृतप्रयत्नापेक्षस्त्वितिसूत्रे निरस्ता । अतः फलार्थिभिरपि भगवानेव सेव्यो नान्य इति सिद्धम् ॥ ४१ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां तृतीयाध्यायस्य द्वितीयः पादः ॥

तृतीयाध्यायस्य तृतीयः पादः।

सर्वत्रेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

सर्वैर्वेदान्तैरनेकरूपनिरूपकैः प्रत्ययो ज्ञानं यस्य तादृशं ब्रह्म। कुतः। चोदना विधिवाक्यं, तस्याविशेषात्। यथा ज्योतिष्टोमे शाखाभेदेन धर्मभेदेऽपि ज्योतिष्टोमविधेरेकरूपत्वात् तदेकत्वं, तथाऽत्रापि शाखाभेदेष्वनेकधा एकमेव ब्रह्म निरूप्यते। शाखान्तरोक्तधर्माणामसति बाधे उपसंहार्यत्वात् ॥ १ ॥

भेदान्नेति चेदेकस्यामपि ॥ २ ॥

ननु धर्मभेदादेकत्वं नास्तीति चेत् तत्राह। एकस्यामपि, यथैकस्यामप्यतिरात्रव्यक्तौ षोडशिग्रहणाग्रहणरूपधर्मभेदेऽप्यतिरात्रं न भिद्यते, तथाऽत्रापि धर्मभेदो धर्मिभेदको नेत्यर्थः ॥ २ ॥

नन्वेवं सति शाखान्तरीयधर्मा उपसंहर्तव्याः स्युः। तथाऽवतारान्तरेऽवतारान्तरधर्मा अपीत्याशङ्क्याह।

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायस्य वेदस्य सम्बन्धी यः समाचारः सोमयागाद्यात्मकस्तस्मिंस्तथात्वेन स्वस्य शाखोक्तप्रकारेण नियमोऽन्यूनाधिककरणलक्षणोऽस्तीति शेषः। कुतः। तत्तच्छाखिनां स्वस्वशाखोक्तप्रकारेणैव कर्मकरणेऽधिकारात्। न्यूनाधिककरणे, यदस्य कर्मण इति दोषश्रवणाच्च। दृष्टान्तेनाप्येतत् साधयति। सववत्। यथा सवा होमविशेषा आथर्वणिकानामेव कार्यत्वेन नियम्यन्ते, नान्येषां, तथेत्यर्थः। उपासनायामपि रामकृष्णादिरूपेषु तत्तद्रूपोपासकस्य तत्तदवतारधर्मा एव भावनीया, न त्ववतारान्तरधर्मा अपि। ब्रह्मणः सर्वधर्मत्वेऽपि तदवतारे तेषां विरुद्धधर्मत्वात् ॥ ३ ॥

दर्शयति च ॥ ४ ॥

अवतारान्तरधर्माणामवतारान्तरभक्तस्य स्वोपास्ये विरोधादनुपसंहर्तव्यत्वेऽपि ब्रह्मणः सर्वधर्मवत्त्वाद् वेद्यैकत्वेन विद्यानामेकत्वं, सर्वे वेदा यत्पदमामनन्तीत्यादिना दर्शयति । चकाराद् भेददर्शननिन्दां, यदा ह्येवैष इतिश्रुत्युक्तां दर्शयतीत्यर्थः ॥ ४ ॥

ननु स्वाध्यायस्येतिसूत्रेऽवतारान्तरेऽवतारान्तरधर्माणामनुपसंहार इत्युक्तम् । श्रीरामोपनिषत्सु, यो वै ये मत्स्यकूर्माद्यवतारा इत्युक्त्वा श्रीरामे, तथा श्रीभगवति, नमस्ते रघुवर्यायेत्यादिषु श्रीकृष्णेऽवतारान्तरधर्माणामुपसंहारः कथं दृश्यत इत्याशङ्क्याह ।

उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च ॥ ५ ॥

इदं सूत्रं योगविभागेन सामान्यविशेषोपासकपरं योज्यम् । तथाहि । नमस्ते रघुवर्यायेत्यादिषु य उपसंहारः, स त्वर्थस्य भगवल्लक्षणस्योभयत्राप्यवनाद्द्वयेऽपि धर्मैरभेदाच्छुद्धब्रह्मोपासकानां, तदभिन्नस्य तदभिन्नत्वमिति न्यायेन धर्माणां भेदाभावेन विरोधभानाऽसम्भवात् सर्वधर्माणामुपसंहार इत्यर्थः । च पुनरेकान्तिभक्तानां तु समानधर्मविशयं विधिशेषवत् तत्तदवतारोपासनविध्युक्तप्रकारवदविरुद्धधर्माणामुपसंहार इत्यर्थः । न तु विरुद्धधर्माणां, तेषु समानत्वाभावात् ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

ननूपसंहारो धर्माणां भेदे सति भवति । तथाच भिन्नानां तेषां ब्रह्मणा भेदे स्वीकृतेऽनेकरसानां तेषामेकरसब्रह्मत्वस्वरूपत्वे ब्रह्मणोऽन्यथात्वं स्यात् । शब्दाद् एकत्वैकरसत्वनिरूपकश्रुतेर्ब्रह्मण एकरसत्वनिरूपकश्रुतेर्ब्रह्मण एकरसत्वेन निरूपणात् तद्विरुद्धमन्यथात्वमनेकरसत्वं स्यात् । ब्रह्मण एकरसत्वे चाङ्गीक्रियमाणेऽनेकरसधर्मैरभेदो न स्यादिति सूत्रार्द्धेनाशङ्क्य परिहरति । न अविशेषात् । यथैकरसत्वं ब्रह्मण श्रुतितो निर्णीयते, तथा श्रुतित एव विरुद्धधर्मवत्त्वेन निर्णयविशेषान्न दोषः ॥ ६ ॥

प्रकारान्तरेण समाधत्ते ।

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

ज्ञानप्रकरणे ज्ञानिनं प्रत्येकरसमदृश्यमग्राह्यमिति निरूपयति श्रुतिः। भक्तिप्रकरणेन भक्तियोगस्य बहुविधत्वाद् भक्तानुभवभेदेन भिन्नभिन्नप्रकारेणाथर्वणोपनिषदि निरूपयति। एवं प्रकरणभेदात् स्वरूपस्यान्यथात्वं नास्तीत्यर्थः। तथाच ज्ञानिनः सर्वत्रैकरसत्वेन मानात् सर्वधर्माणामुपसंहारः। उत्तरतापिन्यां ज्ञानिप्रकरणे उपसंहारोक्तेः। भक्तस्य त्वनेकरसत्वेन मानात् तदसाधारणधर्माणामेवोपसंहार इति व्यवस्थितविकल्पाश्रयेण वा समाधानम्। अत्र दृष्टान्तः। परोवरीयस्त्वादिवत्। यथा परोवरीयस्त्वानामकस्तवविशेषस्य दीक्षाप्रकरणे पठितत्वाद् दीक्षासहितस्यैव परोवरीयस्त्वम्। तां विनोक्तरीत्या मते तु न परोवरीयस्त्वम्। तथाऽत्रापीत्यर्थः ॥७॥

ननु ज्ञानिभक्तयोरपि ब्रह्मोपासकत्वरूपसंज्ञाया एकत्वात् तयोः प्रकरणभेद एव नास्तीति संदेहकत्वात् पूर्वसूत्रोक्तव्यवस्थाऽनुपपन्नेत्याशङ्क्य परिहरति।

संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥

उपास्यब्रह्मण एकत्वादुपासकस्यापि ब्रह्मोपासकत्वसंज्ञाऽविशिष्टेति सर्वधर्मोपसंहारः स्यादिति चेद्, एतच्छङ्कोत्तरं पूर्वमेवोक्तं, न वा प्रकरणभेदादिति। एकान्तभक्तस्य तत्स्वरूपैकनिष्ठत्वेन तत्र भक्त्यतिशयेनान्यधर्माणामनुपसंहारः। अनेकान्तभक्तस्य तु साधारणप्रकारेण श्रीरामादिस्वरूपेषु ब्रह्मत्वेन ज्ञानात् सर्वधर्मोपसंहारे बाधकाभाव इत्युक्तमित्यर्थः। संज्ञैकत्वेऽप्यान्तरनिष्ठाभेदान्नैकरूपोपासनेत्यर्थः। संज्ञैकत्वस्याप्रयोजकत्वमाह। अस्ति तु तदपि। परोवरीयस्त्वाद्युपासनेषु भिन्नेषूद्गीथोपासनेतिसंज्ञैकत्वेऽपि यथा धर्मभेदस्तथाऽत्रापीत्यर्थः ॥ ८ ॥

ननूपास्यरूपेषु बाल्यपौगण्डादिरूपा अवस्था उच्यन्ते। एवञ्च विग्रहे न्यूनाधिकाभावान्मध्यमपरिमाणप्रसक्त्या सच्चिदानन्दत्वमनुपपन्नमित्याशङ्क्याह।

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

सर्वतः पाणिपादान्तमित्यादिश्रुतेः साकारमेव व्यापकं ब्रह्म, सर्वरस इति श्रुत्या रसात्मकं च यादृग्रूपेण भक्तानां सम्यग्लीलारसानुभवो भवति तादृग्रूपं प्रकटीकृत्य विहरतीति नोक्तदोषः । तद्वस्त्वेव प्रमाणसिद्धं तादृशमिति मन्तव्यम् ॥ ९ ॥

ननु लीलाया नित्यत्वेन तत्सम्बन्धिभक्तानामपि नित्यत्वादेकस्य भक्तस्यानेकलीलासम्बन्धोऽनुपपन्नः । तथात्वे तु लीलाया अनित्यत्वं स्याद् भक्तस्य वाऽनेकत्वम् । तदुभयमपि प्रमाणविरुद्धमित्याशङ्क्याह ।

सर्वाभेदादन्यत्रेमे ॥ १० ॥

लीलासम्बन्धिसर्वपदार्थानां भगवता सहाऽभेदादन्यत्राभिमलीलायामपि इमे एव भक्ता, न त्वन्ये । एवं लीलासम्बन्धिनां भगवद्रूपत्वाद् भगवत इव व्यापकत्वेनैकस्यैव सर्वलीलासम्बन्धित्वं न विरुद्धमिति भावः । एतेन सच्चिदानन्दात्मकसर्गादिलीलाया अपि भगवल्लीलात्वेन नित्यत्वात् तत्सम्बन्धिजीवानां विसर्गलीलासम्बन्धित्वं न स्यात् । तत्सम्बन्धित्वे तु लीलाया अनित्यत्वं स्यादित्याशङ्का परिहृता । तत्रापि सर्वाभेदात् सर्गादिलीलामध्यपातिनां सर्वेषां जीवानां पदार्थानां च ब्रह्मणा सहाभेदाद् ब्रह्मणश्चैकत्वाद् व्यापकत्वाच्च पूर्वलीलातोऽन्यत्र उत्तरलीलायामपि इमे पूर्वलीलासम्बन्धिन एव पदार्था जीवाश्चेत्यर्थकथनात् । तदुक्तं निबन्धे, व्यापकत्वश्रुतिस्तस्य भगवत्त्वेन युज्यत इति ॥ १० ॥

ननु यथा लीलास्थितजीवानां भगवदभिन्नत्वेन व्यापकत्वमुक्तं, तथा साधकजीवानामपि ब्रह्मांशत्वेन भगवदभिन्नत्वात् पूर्णानन्दादिधर्मवत्त्वं स्यात् । नच तेषां तद्वत्त्वं वक्तुं शक्यम् । दुःखनाशार्थं भगवत्प्रार्थनदर्शनादित्याशङ्क्याह ।

आनन्दादयः प्रधानस्य ॥ ११ ॥

पूर्णानन्दादयः प्रधानस्य भगवत एव धर्माः, न तु जीवस्य । भगवदभेदादेव ते धर्मा जीवे आविर्भवन्ति । साधकजीवानां तु भगवदभेदास्फूर्त्या पूर्णानन्दादिभगवद्धर्माविर्भावाभावाद् दुःखस्फूर्तिः । अतस्तन्नाशार्थं भगवत्प्रार्थनं तेषां युक्तमेव । श्रीभगवता सार्द्धं जीवा-

नाममेदप्रकारस्तु श्रीकृष्णचैतन्यमतेऽप्येवम्। तथाहि चैतन्यगुणो-द्देशदीपिकायां धामपरिकरपरिच्छदभक्तशक्तिस्वरूपैः कृष्णस्य पञ्चतत्त्वात्मकत्वं निरूपितम्। सन्दर्भेऽपि, एकमेव तत्त्वं चतुर्धा विराजते स्वरूपतद्वैभवजीवप्रधानरूपेणेत्युक्तम्। अत्र वैभवशब्देन धामपरिकरपरिच्छदभक्तशक्त्यादीनां ग्रहणं ज्ञेयम्। तेषामपि तत्त्वतो व्यतिरिक्तत्वाभावात्। अतोऽनादित एव तत्तत्परिकररूपेण विराजता भगवता सार्द्धं भक्तानाममेदः। अतो यावत्पर्यन्तं साधकभक्तस्य सिद्धदेहात्मकेन भगवता सार्द्धममेदो न स्फुरति, तावत् पूर्णानन्दस्फूर्तिः स्वस्मिन्न भवति। पूर्णानन्दादिधर्माणां भगवद्धर्मत्वात्। पूर्वोक्तप्रकारेण भगवदभेदस्फूर्तौ तु ते धर्मा जीवे स्वत आविर्भवन्ति। जीवस्य चाक्षरांशत्वादक्षरस्य गणितानन्दत्वाद् भगवदभेदस्फूर्तिं विना जीवे पूर्णानन्दास्फूर्तिर्युक्तैवेति ज्ञेयम्। सच्चिदानन्ददेहानां पूर्वसिद्धत्वं तु, अव्यक्तमूलं भुवताङ्घ्रिपेन्द्रेतिश्लोकसुबोधिन्यामुक्तम्। सन्दर्भेऽपि, वैकुण्ठेऽनादिभूता एव सच्चिदानन्दमया देहा वर्त्तन्त इत्युक्तम्॥ ११॥

ननु प्रियशिरस्त्वादिधर्माणामपि प्रधानधर्मत्वाऽविशेषात्तेषामप्युपसंहारः कर्तव्य इत्याशङ्क्याह।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

प्रियशिरस्त्वादीनामप्राप्तिः। कुतः। प्रियमोदाद्युपचयापचयौ हि भेदे सम्भवतः। अन्तःकरणशुद्धितारतम्येन ह्यानन्दे प्रियत्वमोदत्वादयो धर्मा उपचयापचयभेदेन भासन्ते। यस्य त्वन्तःकरणशुद्धिर्जाता, तस्य तु निर्भेदमेकरसमखण्डमानन्दात्मकमेव ब्रह्म भासते। अतो न शुद्धाभेदज्ञानिनां प्रियशिरस्त्वादिधर्माणामुपसंहारः॥ १२॥

ननु निर्गुणे ब्रह्मणि सगुणधर्माणामनुपसंहारे तद्धर्माणां त्यागः स्यादित्यत आह।

इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे विरुद्धधर्मा भजनीयत्वमत्स्यत्वरघुवर्यत्वादयः, अर्थस्य ब्रह्मणः सामान्याद् धर्मिरूपेणोपसंहार्या, न तु धर्मरूपेण। यथा रघुवर्यादिधर्माणां धर्मिरूपत्वेन अर्थस्य सामान्यान्मत्स्यादिषूपसंहा-

रः । तथा निराकारे ब्रह्मणि साकारत्वादयः, पुरुषे शृङ्गपुच्छत्वादयो धर्मा नोपसंहार्याः, किन्तु धर्मिरूपा एव त इति बोध्याः ॥ १३ ॥

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

आध्यानाय हि गुणानामुपसंहारो यावता ध्यानसिद्धिस्तावतामेव गुणानामुपसंहारः । अन्येषां तु प्रयोजनाभावान्नोपसंहारः । तथा भक्तिमार्गीयाणां शुद्धान्तःकरणानामन्तःकरणशुद्धिरूपप्रयोजनस्याभावान्न पक्षपुच्छादीनामुपसंहारः । तावता परोक्षनादेनोक्तप्रियत्वादिनैव ध्यानसिद्धेः । एकान्तश्रीरामभक्तस्यापि श्रीरामोपासनोक्तधर्मैरेव चारितार्थ्येन न मत्स्योपासनोक्तधर्माणामुपसंहारः । कुतः । प्रयोजनाभावात् । यथा निर्गुणोपासकस्यापि स्वरूपेणैव चारितार्थ्ये न सर्वेषां गुणानामुपसंहारः ॥ १४ ॥

आनन्दादीनां धर्मिरूपेणोपसंहारे पक्षादीनामनुपसंहारे हेत्वन्तरमप्याह ।

आत्मशब्दाच्च ॥ १५ ॥

आनन्द आत्मेत्यनेन आनन्दस्यात्मत्वेन कथनात् तेषामप्यानन्दरूपत्वादात्मस्वरूपेणैव मोदप्रमोदादीनामुपसंहारः कर्तव्यः, न तु पक्षपुच्छादिरूपेण, न चोपचयापचयरूपेण, न वा भेदेन । किन्त्वात्मरूपेणैवोपसंहर्तव्याः । अनेन निर्गुणोपासकैरानन्दादीनां धर्मित्वेनोपसंहारेऽनुपपत्तिः परास्ता । आनन्दस्यात्मरूपत्वेन कथनाद् धर्मरूपत्वाभावात् ॥ १५ ॥

ननु तैत्तिरीयेऽन्नमयादिष्विवानन्दमयेऽपि, तस्यैव एव शारीर आत्मेत्युक्तम् । शरीराभिमानी शारीरो जीव एव । अतः, आनन्दो ब्रह्मेति व्यजानादिति ब्रह्मत्वकथनादानन्दमयस्य जीवत्वमपि न वक्तुं शक्यमत आनन्दादयोऽपि धर्मरूपा एवेति पूर्वमुक्तमानन्दस्य धर्मिरूपत्वमनुपपन्नमित्याशङ्क्याह ।

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

तस्यैष एव शारीर आत्मेति यदितरवद् आत्मगृहीतिरन्नमयादिष्वात्मग्रहणं, तदुत्तरात् सर्वेभ्य उत्तर आनन्दमयस्तस्मादं-

तोः । तथाचान्नमयादिष्वप्यानन्दमयस्यात्मत्वेन कथनात् तत्प्रकारेणानन्दमयेऽपि, तस्यैव एव शारीर आत्मेतिकथनादानन्दमयस्य परमकाष्ठापन्नत्वेन अतोऽतिरिक्तब्रह्मणोऽभावान्न जीवत्वमित्यर्थः ॥१६॥

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥

नन्वन्नमयादिष्वन्योऽन्तर आत्मेतिकथनात् प्रत्येकं भिन्नेष्वन्नमयादिषु शारीर आत्मा जीवः शरीराभिमानी भिन्नो भिन्न उच्यते । आनन्दमये तु या तथोक्तिः सा तु तस्यान्वयाद् व्यापकत्वेन सर्वत्रान्वयात् सम्बन्धान्न तु जीवत्वेनेति सूत्रार्द्धेनाशङ्क्य परिहरति । स्यात् । आनन्दमय एवान्नमयादिशरीराभिमानी स्यान्न तु भिन्नो जीवः । कुतः । एव ह्येवेत्येवकारेण तस्यैवात्मत्वेनावधारणान्निर्द्धारणादित्यर्थः ॥ १७ ॥

ननु तैत्तिरीयोपनिषत्सु, तस्माद्वा एतस्मादित्याकाशादिमहाभूतसृष्टिमुक्त्वाऽग्रे, ओषधीभ्योऽन्नम् अन्नात् पुरुषः स वा एष पुरुषोऽन्नरसमय इत्युक्तम्, भार्गव्यां विद्यायामपि, अन्नं ब्रह्मेति व्यजानादित्युक्तम् । तत्र, स वा एष पुरुष इत्यत्र, स एवेति प्रत्यभिज्ञानादन्नकार्यात्मक एव पुरुषः प्रतीयते । अग्रे तस्य ब्रह्मत्वेन ज्ञानकथनं तूपासनार्थमित्याशङ्क्याह ।

कार्याख्यानादपूर्वम् ॥ १८ ॥

अन्नकार्यभौतिकपुरुषस्याख्यानात् कथनाद् ब्रह्मत्वेन ज्ञानविषयं, स वा एष इत्यनेन प्रतिपाद्यमपूर्वं तदैवाध्यात्मिकरूपं वदति श्रुतिरित्यर्थः । आध्यात्मिकपुरुषरूपनिरूपणात्, स वा एष इति न प्रत्यभिज्ञानम् । आधिभौतिकाध्यात्मिकभेदस्य स्पष्टत्वादित्यर्थः ॥

अथवा, बृहदारण्यके, आत्मेत्येवोपासीतेत्युपक्रम्य तस्य सर्वेभ्यः प्रियत्वमुक्त्वाऽग्रेऽन्यस्य प्रियत्वं निराकृत्य, ईश्वरो हि तथा स्याद् आत्मानमेव प्रियमुपासीतेति पठितम् । अत्रात्मपदेन जीवात्मनः प्रियत्वेनोपासनं विधीयते, उत ब्रह्मणः, ईश्वरपदादिति संशये, यथा श्रुत्यन्तरे पुत्रादीनामौपाधिकप्रियत्वकथनाज्जीवात्मन एव प्रियत्वमुच्यते तथेहापि प्रतीतेर्जीवात्मन एव प्रियत्वेनोपासनो-

केति प्राप्ते, उच्यते । कार्याख्यानादिति । प्राणन्नेव प्राणो भवतीत्या-
दिपूर्वश्रुतावेकस्यैवात्मनः सर्वेन्द्रियकार्यैः कृत्वा आख्यानादपूर्वं जी-
वभिन्नमीश्वरमेव श्रुतिर्वदतीत्यर्थः। अत एवात्रेश्वरो हीत्यत्रेश्वरपदं
सर्वस्मादन्तरमिति चोक्तम् ॥ १८ ॥

ननु भगवद्विग्रहे चक्षुरादीनां वैलक्षण्येन प्रतीतेरात्मनश्चै-
करसत्वात् सर्वेन्द्रियकार्यकर्तृत्वं ब्रह्मणि न सम्भवतीत्याशङ्क्याह ।

समान एवञ्चाभेदात् ॥ १९ ॥

अप्यर्थे चः । एवमपि सति चक्षुःश्रोत्रादीनां वैलक्षण्येन भा-
नेऽपि समान एकरूप एव भगवान् । कुतः । चक्षुरादीनां ब्रह्मत्वेन
परस्परमभेदादित्यर्थः । तथाचानन्द एव ब्रह्मण्याकारसमर्पकस्तया
तथा भातीति न वैजात्यशङ्केति भावः ॥ १९ ॥

अथ यत्र कार्यार्थे जीवविशेषे भगवदावेशस्तद्भगवदाविष्टजी-
वोपासकेन सकलभगवद्धर्माणां तत्रोपसंहारः कर्तव्यो न वेत्याश-
ङ्क्य सूत्रद्वयेन विकल्पमेव स्थापयति ।

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

अन्यत्रापि भगवदाविष्टजीवेऽपि, एवं सकलब्रह्मधर्मोपसंहा-
रेणोपासनं कार्यम् । कुतः । अयोगोलके वह्निरिव तस्मिन् भगवदावि-
शलक्षणसम्बन्धादित्यर्थः ॥ २० ॥

निषेधपक्षमुपपादयति ।

न वाऽविशेषात् ॥ २१ ॥

यस्तु भगवदाविष्टं भक्तं ज्ञात्वैतद्भजनेनैवाहं कृतार्थः स्यामिति
ज्ञात्वा तं भक्तं भजते, तस्य तद्भक्तभजनमेव परमपुरुषार्थसाधकमि-
ति तत्र भगवद्धर्मोपसंहारे विशेषाऽभावात् स न कार्यः ॥ २१ ॥

दर्शयति च ॥ २२ ॥

उपसंहारो नाम तत्रानुपलभ्यमानानां धर्माणां तत्र भावन-
म् । तादृशभक्तेषु तु भगवान् सर्वधर्मान् प्रत्यक्षतो दर्शयतीति तद्भ-
क्तानां नोपसंहारापेक्षेत्यर्थः ॥ २२ ॥

ननु तादृशभक्तेऽलौकिकभगवद्धर्मान् ऐश्वर्यादीन् दृष्ट्वा तद्भक्तै स्वसेव्ये द्युलोकव्याप्त्यादयो धर्मा उपसंहर्तव्याः स्युरित्याशङ्क्य, नेत्याह।

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

सकलवीर्यसम्भृतिद्युव्याप्त्यादयोऽपि धर्मा नोपसंहर्तव्याः। अतः पूर्वोक्तविशेषाभावरूपहेतोरित्यर्थः ॥ २३ ॥

ननु तैत्तिरीयोपनिषत्सु, सहस्रशीर्षा पुरुष इत्यादिना पुरुषविद्या निरूप्यते। ब्रह्मप्रपाठकेऽपि, स वा एष पुरुषोऽन्नरसमय इत्यारभ्य, प्राणमयादय आनन्दमयान्ता निरूप्यन्ते। तेषु पुरुषविधत्वं चोच्यते। एवं चान्नमयादिषु पुरुषविधत्वश्रवणात् तेष्वपि सहस्रशीर्षत्वाद्युपसंहारः कर्तव्य एवेत्याशङ्क्याह।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥

पुरुषविद्यायां सहस्रशीर्षा इत्यत्र यथाऽनेकोपलक्षकसहस्रपदेन साकारव्यापकाधिदैविकब्रह्मस्वरूपं निरूप्यते, न तथा इतरेषाम् अन्नमयादीनां भौतिकानां पुरुषविधस्याध्यात्मिकस्य चाम्नानं निरूपणम्। तस्मात् तेषु सहस्रशीर्षत्वाद्युपसंहारो न कर्तव्य इत्यर्थः ॥ २४ ॥

अतः परं भगवतो निर्दोषत्वं ज्ञात्वा भजनं कर्तव्यमितिज्ञापनार्थमधिकरणान्तरमारभते।

वेधाद्यर्थभेदात् ॥ २५ ॥

बृहदारण्यके छान्दोग्ये च देवानां दैत्यपराजयार्थे यज्ञे वागादिषूद्गानसमये दैत्यैः कृतः पापवेध उक्तः। आसन्ये दैत्यैः क्रियमाणोऽपि पापवेधो नाभूदित्युक्तम्। तत्र को हेतुरित्याकाङ्क्षायामुच्यते। वागादिषु यः पापवेध, आदिपदाद् दैत्यैः पराजयश्चोक्त, सोऽर्थस्य भगवल्लक्षणस्य भेदात् सम्बन्धाभावादित्यर्थः। आसन्यस्य तु नित्यं भगवत्सम्बद्धत्वान्न दोषसम्बन्धः। एवञ्च यत्सम्बन्धाद्दोषसम्बन्धाभावोऽन्यस्य तस्य निर्दोषत्वे किं वाच्यमित्यर्थः ॥ २५ ॥

भगवत्सम्बन्धाभावे गुणहानिमप्याह।

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दः-स्तुत्युपगानवत् तदुक्तम् ॥ २६ ॥

हानौ जीवस्य भगवत्सकाशाद् विभागे ये जीवनिष्ठा धर्मास्तिरोहिता भगवदिच्छयाऽऽनन्दांशैश्वर्यादयस्ते भगवत्सम्बन्धे सति पुनराविर्भूता भवन्तीति, परमं साम्यमुपैतीतिश्रुतेरित्यर्थः । न तु सर्वथा सर्वभगवद्धर्मवत्त्वम् । ननु तैरेव धर्मैः साम्यं, नान्यैरत्र किं नियामकमित्याशङ्क्याह । उपायनशब्दशेषत्वात् । उपायनं प्राप्तिः सा स्वधर्माणामेव नान्येषाम् । तथाचोपायनशब्देन कथनात् तैरेव धर्मैः साम्यमित्यर्थः । नन्वानन्दादिभिः साम्ये ब्रह्माऽभेद एव स्यादित्याशङ्क्याह । कुशेत्यादि । कुशा औदुम्बर्यः समिधस्तत्सम्बन्धि यच्छन्दःस्तुत्युपगानं तद्वत् । तद्गानसम्बन्धिन्यभित्वा शूर नोनुम इत्यृचि, अत्र एवोपसंहृत्य भकारेण गानं क्रियते । तेनावता भकाराणाम् ऋग्गात्मकत्वं सम्भवति । तथात्रापीत्यर्थः । ननु तत्त्वमस्यादिवाक्यैर्जीवेऽभेदबोधनादत्राभेदोऽस्त्वित्याशङ्क्याह । तदुक्तम् । अभेदबोधनतात्पर्यं पूर्वमुक्तमित्यर्थः ॥ २६ ॥

सम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥

सम्यक् परस्य पुरुषोत्तमस्याऽऽयो लाभो येन स सम्परायो भक्तिमार्गस्तस्मिन् प्राप्तव्ये सति तर्तव्यस्य पापस्याभावाज्ज्ञानेनैव, भक्त्या न पापनाशः, नराणां क्षीणपापानामितिवाक्यात् पूर्वमेव पापानां नष्टत्वात् । ननु सर्वं पाप्मानं तरन्तीतिश्रुत्या भक्त्या पापनाशः कुतो नाङ्गीक्रियते, तत्राह । तथा ह्यन्ये । तस्याः श्रुतेर्ज्ञानमार्गीयविषयत्वाज्ज्ञानानन्तरं पापवन्तो भक्तिमार्गीयेभ्योऽन्य इत्यर्थः । ननु भक्तेः पापनाशकत्वबोधकानां, केचित् केवलया भक्त्याऽघं धुन्वन्तीत्यादिवचनानां का गतिरिति चेत् । तत्र, यथा हि भानोदयो नृचक्षुषामित्युक्तरीत्या यथा सूर्येण स्वोदयात् पूर्वमेव तमो नाश्यते, न तु स्वोत्पत्त्यनन्तरमितिसूचनान्न दोषः ॥ २७ ॥

ननु तर्हि भरतस्य भक्त्युत्तरं मृगदेहारम्भकपापस्थित्यसम्भव इत्याशङ्क्याह ।

छन्दत उभयाविरोधात् ॥ २८ ॥

छन्दतो भक्तिमार्गे भगवतो विशिष्टफलदानेच्छातो वा भक्तेरनन्तरमपि पापनाशो भवति । नराणां क्षीणपापानामित्यादीनां, भरतस्य मृगदेहारम्भकप्रारब्धकर्मसत्त्वबोधकवचनानां चाविरोधादेवं ज्ञातव्यमित्यर्थः ॥ २८ ॥

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ २९ ॥

गतेर्ज्ञानस्यार्थवत्त्वं फलजनकत्वमुभयथा मर्यादापुष्टिभेदेन । अन्यथा एवमनङ्गीकारे, ज्ञानेनैव हि कैवल्यं, यमेवैष वृणुत इति वाक्ययोर्विरोधः स्यात् ॥ २९ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥

मुमुक्षोः सकाशाद् रहस्यभजनकर्त्तैवोपपन्न उपपत्तियुक्तः । कुतः । भगवल्लक्षणस्यार्थस्य पुरुषार्थस्य स्वाधीनत्वेनोपलब्धेः । अत्र दृष्टान्तः । लोकवत् । लोके यथा स्वाधीनपतिका भर्तारं स्वाधीनं फलत्वेन मनुते, न तु गृहवित्तादिकं तथेत्यर्थः ॥ ३० ॥

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥

भगवतो धारणरसनभजनध्यानादीनां समुदितानामेव फलसाधकत्वमित्यनियमः । यतः सर्वासां धारणादिभक्तीनां फलं प्रत्यविरोध, समुदितानामेव फलसाधकत्व, न प्रत्येकमेवंलक्षणो विरोधो नास्ति । कुतः । शब्दानुमानाभ्याम् । चिन्तयंश्चेतसा कृष्णमिति श्रुतेः, केवलेन हि भावेनेतिस्मृतेश्चेत्यर्थः ॥ ३१ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

यस्मिन्नपि कार्यविशेषसाधनार्थं भगवता ये स्वकीयधर्माः स्थापितास्ते आधिकारिका उच्यन्ते । तेषां स्थितिर्यावदधिकारं यावत्कार्यम् । तस्मिन् कार्ये सम्पन्ने तान् धर्मान् भगवानाकर्षतीत्यर्थः । न तु यावत् तेषां जीवनं तावत् स्थापयति । तेषां कृतार्थता तु भवत्येवेति भावः ॥ ३२ ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्या-मौपसदवत् तदुक्तम् ॥ ३३ ॥

अक्षरविषयकज्ञानानां मोक्षसाधनेषु योऽवरोधो गणना सा सामान्यतद्भावाभ्यां भवति । अत्र मुख्या मुक्तिः पुरुषोत्तमप्राप्तिरेव । ज्ञानिनां तु साक्षात् पुरुषोत्तमसम्बन्धाभावात् तत्सम्बन्ध्यक्षरसम्बन्धरूपा सामान्यमुक्तिर्भवति । सम्बन्धोऽत्राभेदसम्बन्धो बोध्यः । अत्राऽक्षरज्ञानस्य साक्षात् साधनत्वम् । भक्तानां तु ब्रह्मभावोत्तरं भगवद्भावेन पुरुषोत्तमप्राप्तिरूपा मुख्या मुक्तिः । अत्राऽक्षरज्ञानस्य परम्परासाधनत्वम् । अक्षरज्ञानेन ब्रह्मभावोत्तरं भगवद्भावात् । एवं मोक्षद्वयेऽप्यक्षरविषयकधियां सामान्यतद्भावाभ्यां साधनत्वमित्यर्थः । अक्षरब्रह्मपुरुषोत्तमयोर्ब्रह्मस्वरूपेण सामान्यम् । तन्वक्षरज्ञानवतामपि केषांचित् तत्रैव लयः, केषांचिद् भक्तिभावो भवतीत्यत्र किं नियामकं तत्राह दृष्टान्तेन । औपसदवत् । उपसदाख्ये कर्माणि यजमानः सर्वेष्वृत्विक्षु यं कामयेत, यज्ञयशसमृच्छेत् तं प्रथमं तानूनप्त्राख्यमाज्यं स्पर्शयेत् । तत्र यथा यजमानेच्छा नियामिका तथाऽत्र भगवदिच्छेत्यर्थः । ननु भगवत्सम्बन्धिश्रवणादीनां यथा भगवत्प्रापकत्वं, तथाऽक्षरज्ञानस्य कुतो नेत्याशङ्क्याह । तदुक्तम् । गीतासु, यदक्षरं वेदविदो वदन्तीत्युपक्रम्य, स याति परमां गतिमित्यन्तेनाक्षरज्ञानेन तस्यैव प्राप्तिर्नतु भगवत इत्युक्तम् ॥ ३३ ॥

इयदामननात् ॥ ३४ ॥

तैत्तिरीयोपनिषत्सु, आनन्दगणने अक्षरानन्द इयद् गणितत्वादल्प इत्यामननात् कथनात् । अत्रानन्दतारतम्यकथनमानन्दानुभवयोग्यलयपूर्वदशापेक्षया । अग्रे ब्रह्मणि लये तु भोक्तृत्वाभावात् तत्र निर्धर्मके ब्रह्मणि संवेद्याद्यभावाच्च नानन्दतारतम्यं सम्भवति । पूर्णपुरुषोत्तमस्यागणितानन्दत्वेन तदपेक्षयोत्कर्षनिरूपणं त्वविचिन्त्यदात्वाद्यमेयम् ॥ ३४ ॥

अथ ज्ञानमार्गीयाणां यथा आत्मत्वेन निर्विशेषब्रह्मज्ञानं भव-

ति, तथा भक्तिमार्गीयस्यापि ज्ञानिवत् स्वात्मत्वेन पुरुषोत्तमज्ञानं भविष्यतीत्याशङ्क्य निषेधति।

अन्तरा भूतग्रामवत् स्वात्मनः॥ ३५॥

भगवता भक्तिमार्गे स्वीयत्वेनाङ्गीकृतो य आत्मा स स्वात्मा, तस्य स्वात्मत्वेन पुरुषोत्तमज्ञानम् अन्तरा भजनेऽन्तरायरूपमिति भगवांस्तन्न सम्पादयतीत्यर्थः। एतद् दृष्टान्तेन साधयति। भूतग्रामवत्। तादृशभक्तविग्रहस्यालौकिकत्वाद् यथा तेषु लौकिको भूतग्रामो न सम्भवति तथेदं ज्ञानमपि॥ ३५॥

अन्यथाऽभेदाऽनुपपत्तिरिति चेन्नोपदेशान्तरवत्॥ ३६॥

अन्यथा तादृशज्ञानस्य बाधकत्वे, एकादशस्कन्धे भक्तेषूद्धवादिष्वभेदज्ञानेनोपदेशानुपपत्तिरिति चेन्न। उपदेशान्तरवत्। यथा गायत्र्युपदेशेन संस्कृतं ब्राह्मणशरीरं वैदिककर्मोपयोगि भवति तथा ज्ञानोपदेशसंस्कृतो भक्तो भक्तिरसानुभवयोग्यो भवति। तदर्थमुपदेशो, नत्वभेदज्ञानार्थमित्यर्थः। ज्ञानिनां भक्तानां च लौकिकभावः सर्वथा निवर्तनीयः। तन्निवृत्तिं विनोभयोरपि फलप्राप्त्यसम्भवात्। तन्निवृत्तिस्तु ज्ञानेनैव भवति। यथा केवलसुवर्णार्थिनः सुवर्णेन कटककुण्डलार्थिनश्च सुवर्णपिण्डे धात्वन्तरभ्रमो निवर्तनीयस्तथाऽक्षरे लयप्रेप्सूनां ज्ञानिनां भगवल्लीलानुभवयोग्यानां भक्तानां च लौकिकभावो निवर्तनीयः। तन्निवृत्तिश्च ज्ञानेनैव भवतीति ज्ञानोपदेशोपयोगः॥ ३६॥

व्यतिहारो विशिंषन्ति हीतरवत्॥ ३७॥

भक्ता, अहं कृष्णः कृष्णोऽहमिति यद्विशिंषन्ति स व्यतिहारः। सोऽपीतरवज्ज्ञेयः। विप्रयोगोद्रेके यथाऽश्रुप्रलापादयो व्यभिचारिभावास्तथा व्यतिहारोऽपि। नैतावताऽभेदज्ञानस्य भक्तिफलत्वमित्यर्थः॥ ३७॥

सैव हि सत्यादयः॥ ३८॥

भक्तानां सत्यधर्मदमादिरूपा भक्तिरेवेति तस्य ज्ञानमार्गीय सत्यादिसाधनानि स्वत एव भवन्तीति न तदर्थं पृथक्प्रयत्नापेक्षेत्यर्थः ॥ ३८ ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

इतरत्र विहितभक्तेरन्यत्र कामाद्यौपाधिकभगवद्भावे कामाद्येव मुक्तिसाधनम् । किञ्चान्यमार्गे हेयत्वेनोक्तेभ्य आयतनादिभ्यो गेहादिभ्यस्तत्र मुक्तिर्भवति । भगवत्सेवासाधनत्वात् ॥ ३९ ॥

आदरादलोपः ॥ ४० ॥

वर्णाश्रमधर्माणां भगवद्धर्माणां च युगपत् करणे प्रसक्ते भगवद्धर्मेष्वादरश्रवणात् कर्मभिस्तेषामलोपः ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥

कर्मभगवद्धर्मयोर्युगपत्करणे उपस्थिते, अत आदराद्धेतोस्तद्वचनाद् भगवद्धर्माणामलोपवचनाद् भगवद्धर्माणां कर्माङ्गत्वमेत्यर्थः ॥ ४१ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॥ ४२ ॥

मम कर्मकरणेऽकरणे वा भगवदिच्छास्तीति निर्द्धारणाऽनियम आधुनिकानामतस्तैर्निष्कामतया कर्तव्यमेव । तद्दृष्टेः तस्या भगवदिच्छाया दर्शनं यस्याऽम्बरीषोद्धवयुधिष्ठिरादेस्तस्य पृथग् जीवकृतकर्मफलाद्भिन्नमीश्वरकृतकर्मणो यत्फलं सन्मार्गरक्षालोकसंग्रहादिकं तदेव फलं, न तु स्वर्गादिकम् । पूर्वोक्तनिष्कामकर्तुस्तु अप्रतिबन्धः कर्मजप्रतिबन्धाभावः फलमित्यर्थः ॥ ४२ ॥

प्रदानवदेव तदुक्तम् ॥ ४३ ॥

तस्मात् स्वमुखयोस्तुल्यत्वेन भगवतोऽर्थं प्रति सर्वागमार्थोपदेशः, स प्रदानवत् प्रकर्षेण दानमेव फलम् । न तु साधनसाध्यः सः । तदुक्तं, नायमात्मा प्रवचनेन लभ्य इति श्रुत्या ॥ ४३ ॥

लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॥ ४४ ॥

चरणस्य लिङ्गं सर्वात्मभावस्तस्य भूयस्त्वात् सर्वतोऽधिकत्वात् तच्चरणमेव सर्वतः कालकर्मादिभ्यो बलीयः। तस्य प्रतिबन्धकं किमपि न भवतीत्यर्थः। ननु ज्ञानमार्गीयज्ञानेन प्रतिबन्धः स्यादित्याशङ्क्याह। तदपि। उक्तमिति शेष, अन्तरा भूतग्रामवत् स्वात्मन इतिसूत्रेण ॥ ४४ ॥

अथ सूत्रद्वयेन पूर्वपक्षमाह।

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥

छान्दोग्ये सनत्कुमारनारदसंवादे, यत्र नान्यत् पश्यतीत्यादिना चरणलिङ्गभूयस्त्व नोच्यते, किन्तु पूर्वविकल्पः स्यात्। पूर्वप्रपाठकोक्तत्वेनकेतुपाख्यानज्ञानस्यैव प्रकारभेदो निरूप्यते। आत्मप्रकरणादुभयोः प्रपाठकयोः। अत्र दृष्टान्त.। क्रियामानसवत्। बाह्या पूजा क्रियेत्युच्यते। आन्तरी मानसमित्युच्यते। परन्तु प्रकरणभेदात् पूजात्वाविशेष.। एवं प्रकारभेदेऽपि ज्ञानत्वाविशेष इत्यर्थः ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

नामैवैतन्नामोपास्स्वेत्यृगादिविधा अनूद्य नामब्रह्मातिदेशादपि ज्ञानप्रकारविशेष एवायमिति प्राप्ते ॥ ४६ ॥

सिद्धान्तमाह।

विद्यैव तु निर्द्धारणात् ॥ ४७ ॥

तु. पूर्वपक्षव्यावर्तकः। अत्र विद्यैव सर्वात्मभाव एव निरूप्यते। भूमैव सुखं, भूमा त्वेव विजिज्ञासितव्य इत्यानन्दात्मकपुरुषोत्तमस्यैव जिज्ञास्यत्वेन निर्द्धारणादित्यर्थः ॥ ४७ ॥

दर्शनाच्च ॥ ४८ ॥

दृश्यते च सर्वात्मभाववतां व्रजभक्तानां पूर्वं सर्वविस्मृतिभ-

गवाश्वपश्वादिनाम्ने सर्वसामर्थ्यम् । तदुक्तं तामिरेव, चित्तं सुखेन भवताऽपहृतं गृहेष्वित्यादि । अत्रापि, तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राणा इतिश्रुतिदर्शनात् सर्वात्मभाव एवोक्त इतिभावः ॥ ४८ ॥

ननु तरति शोकमात्मविदित्युपक्रमाज्ज्ञानमेवात्र प्रतिपाद्यं, न सर्वात्मभाव इत्याशङ्क्याह ।

श्रुत्यादिबलीयस्त्वाच्च न बाधा ॥ ४९ ॥

एवमुपक्रमगतात्मवाक्यानुरोधात् सर्वात्मभावलिङ्गभूयस्त्वस्य न बाधा, वाक्यापेक्षया श्रुतिलिङ्गयोर्बलीयस्त्वात् । अतः श्रुतिलिङ्गानुरोधात् सर्वात्मभाव एवात्र प्रतिपाद्यो, न ज्ञानम् ॥ ४९ ॥

ननु स्वे महिम्नि प्रतिष्ठित इतिश्रुत्या न सर्वात्मभाव उच्यते, किन्तु ब्रह्मणः स्वाधारत्वमेव युक्तमिति प्रतिपाद्यत इत्याशङ्क्याह ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ५० ॥

भूमा कुत्र प्रतिष्ठित इतिप्रश्ने, स्वे महिम्नीत्युत्तरमुक्त्वा, स वा एष एवं पश्यन्नित्यनेन तच्छब्दस्य पूर्वपरामर्शित्वाद् भूमाधिकरणसर्वात्मभावादिभ्यो हेतुभ्यः सर्वात्मभाव एवात्र प्रतिपाद्यो, न ब्रह्मणः स्वाधारत्वमित्यर्थः । अन्यथा कुत्र प्रतिष्ठित इति प्रश्ने, न कापीत्येव वदेत् । ननु सर्वात्मभावस्यापि फलं मुक्तिरेवेत्याशङ्क्याह । प्रज्ञान्तरपृथक्त्ववत् । सर्वात्मभाववद्भक्तप्रज्ञातो भिन्ना प्रज्ञान्तरं मुमुक्षुभक्तस्य स्वकृतार्थताविषयकं ज्ञानम् । तस्य यथा पृथक्त्वं पृथक्फलसाधकत्वं कर्मज्ञानादिफलेभ्यः पार्थक्येन मोक्षसाधकत्वं, तथा सर्वात्मभाववद्भक्तप्रज्ञाया भगवल्लीलासाधकत्वं, न तु स्वकामनासाधकत्वम् । अतः सर्वात्मभावस्य भगवल्लीलासाधकत्वं, न तु मोक्षसाधकत्वम् । अत्र व्यासः स्वानुभवमेव प्रमाणयति । दृष्टश्च । एतादृशभक्तस्य स्वरूपानुभवातिरिक्तफलाभावोऽस्माभिरेव व्रजभक्तादौ दृष्टः । अत्र शब्दोऽपि प्रमाणमित्याह । तदुक्तम् । अहं भक्तपराधीन इत्यारभ्य, वशे कुर्वन्ति मां भक्त्येति भगवतोक्तमित्यर्थः ॥५०॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥५१॥

ननु सर्वात्मभावनिरूपकसनत्कुमारनारदसंवादप्रपाठके तस्य सर्वेषु लोकेषु कामचारो भवतीत्युक्त्या सर्वात्मभाववद्भक्तस्याप्यन्यकामना दृश्यत इत्याशङ्क्याह । न । तर्हि कथमेवमुक्तं तत्राह । सामान्यादप्युपलब्धेः । तत्समानधर्मसम्बन्धादपि श्रुतौ तत्प्रयोग उपलक्ष्यते बहुशः । प्रकृतेऽपि विविधसुखप्रधानालोकानां भगवत्सम्बन्धिसर्वसुखेषु कामचारो भवतीत्यभिप्रायेण तथोच्यते । ननु यथाश्रुतार्थः किमर्थं त्यज्यत इत्याशङ्क्याह । मृत्युवन्न हि लोकापत्तिः यथा, न पश्यो मृत्युं पश्यतीति तादृशभाववतो मृत्युनिषेधः क्रियते तथा भगवत्स्वरूपातिरिक्तलोकान्तरसम्बन्धोऽपि न सम्मतीत्यर्थः ॥ ५१ ॥

अत्र हेत्वन्तरमाह ।

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥५२॥

शब्दस्य आत्मन एवेद९ सर्वमितिपूर्वोक्तश्रुतिवाक्यस्य, परेण, सर्वमाप्नोति सर्वश इति वाक्येन ताद्विध्यम् एकरूपत्वमस्तीति, न लोकान्तरसम्बन्धो वक्तुं यस्य इत्यर्थः । नन्वात्मन एवेद९ सर्वमित्युक्तमेव, पुनः सर्वमाप्नोतीति किमर्थमुक्तं, तत्र हेतुमाह । तुः शङ्कानिरासे । हेतूनां बाहुल्ये दार्ढ्यं भवतीति पुनरनुबन्धः कृत इत्यर्थः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

अत्र एवैके शाखिन आत्मनो भगवतो भक्तशरीरे भावाद्वाविर्भावात् तेन सह कामोपभोगनिरूपिकां, सोऽश्नुते सर्वान् कामानितिश्रुतिं पठन्तीत्यर्थः ॥ ५३ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥

ज्ञानिनां हृदये परमव्योमाविर्भावस्य व्यतिरेकः । कुतः ? तद्भावाभावित्वात् । वरणाभावेन भगवद्भावस्याभावात् । ननु भगवतो ज्ञानविषयत्ववदाविर्भावोऽप्यस्तु तत्राह । न तूपलब्धिवत् ।

उपलब्धिदर्शने यथा साधनसाध्यं, तद्वद् भगवद्वरणं विना हृदये परमव्योमाविर्भावाभावेन भगवदाविर्भावो न भवतीत्यर्थः । तस्य साधनान्तरासाध्यत्वात् ॥ ५४ ॥

तत्र निदर्शनमाह ।

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

हि यतः प्रतिवेदम् अङ्गावबद्धा ऋत्विजो हौत्रौद्गात्रादिप्रतिवेदनियतकर्मकरणार्थमवबद्धा वृता यजमानेन ते यथा सर्वशाखीयकर्मकरणसमर्था अपि तत्राधिकाराभावात् सर्वशाखासु न प्रभवन्ति, तथात्र भगवतस्तादृशवरणाभावाज्ज्ञानिनां हृदि परमव्योमाविर्भावो न भवतीत्यर्थः ॥ ५५ ॥

ननु केषांचित् कर्मज्ञाननिष्ठानामपि कृपया भक्तिमार्गे वरणं दृश्यत इति श्रुतिदृष्टान्तवैषम्यमित्याशङ्क्याह ।

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥

यथैक एव कश्चिन्मन्त्रोऽनेककर्मसु विनियुज्यते, कश्चिद् द्वयोः, कश्चिदेकत्रैव, तथा शास्त्रे विधानात् । एवं भगवदिच्छया जीवोऽपि कश्चित् कर्मनिष्ठां प्राप्य वरणेन भक्तिनिष्ठां प्राप्नोति, कश्चित्तु ज्ञाननिष्ठामेव प्राप्य, कश्चित्तु प्रथमत एव भक्तौ व्रियत इति विरोधो नेत्यर्थः ॥५६॥

ननु लिङ्गभूयस्त्वादितिसूत्रे सर्वात्मभावस्य सर्वतोऽधिकत्वं यन्निरूपितं, तन्नोपपद्यते । सर्वात्मभाववद्भक्ते यथा सर्वत्र भगवद्भाव उक्तस्तथा लौकिकनायकस्यापि, सा सा सा सा जगति सकल इत्यादिषु सर्वत्र नायिकाभानदर्शनादतो लौकिकरसतुल्यत्वादस्य सर्वोत्कृष्टत्वमित्याशङ्क्याह ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥५७॥

भूम्नः सर्वात्मभावस्य ज्यायस्त्वं सर्वोत्कृष्टत्वं ज्ञेयम् । न चोक्तं लौकिकरसतुल्यत्वं दोषः । क्रतुवदिति । यथा दर्शपूर्णमासादियागेषु दोहनाधिश्रयणादिकर्मणां लौकिककर्मतौल्येऽपि न लौकिकत्वम् अलौकिकप्रमाणैकसमधिगम्यत्वात् । तथास्यापि भावस्य तथात्वं ज्ञेयम् । तत्रोपपत्तिमाह । तथाहीत्यादि । तथाहि, श्रा-

त्मनः प्राणा इत्यादिश्रुतिः सर्वात्मभाववतः सर्वं भगवत एवेति ब्रू-शेयति । लौकिकनायकप्राणानां तु तत्त्वजन्यत्वान्न सर्वात्मभाव-वद्भक्तप्राणादितौल्यम् । अतोऽस्य सर्वतो ज्यायस्त्वे कोऽपि दोषो न शङ्क्यः । इदं भक्त्यादीनामप्युपलक्षणम् । तेषामपि प्रतीत्या लौकिक-क्रियारूपत्वेऽपि भगवद्विषयत्वादलौकिकप्रमाणबोधितत्वाच्चालौकिक-त्वमेवेति ज्ञेयम् ॥ ५७ ॥

एवं सर्वात्मभावस्वरूपं विचार्य प्रकान्त उपासनानिर्णय उ-पसंहारे निरूपयति ।

नाना शब्दादिभेदात् ॥ ५८ ॥

सर्वेषु श्रीरामाद्यवतारेषु नानैवोपासना कार्या, न तु सर्वा-वतारविशिष्टस्यैकस्य ब्रह्मणः । तत्तत्स्वरूपसम्बन्धिशब्दानां मन्त्राणां विधायकशब्दानाम् आदिपदादाकारचरित्राणां च भेदादित्यर्थः ॥ ५८॥

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥

पार्थक्येन कर्तव्यानामुपासनानां विकल्पो, न त्वग्निहोत्रद-र्शपूर्णमासादिवत् समुच्चयः । कुतः । अविशिष्टफलत्वात् । एको-पासनेनैव मोक्षात्मकफलसिद्धावन्योपासनस्याविशिष्टफलत्वात् । तेनापि मोक्षस्यैव सिद्धेः ॥ ५९ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्व-हेत्वभावात् ॥ ६० ॥

यास्तु काम्योपासना भिन्नभिन्नफलिकास्ता यथाकामं समु-च्चीयेरन् । यस्य यत्फलकामना तेन तावदुपासना कर्तव्या । पूर्व-हेतोरविशिष्टफलत्वस्याभावात् फलगतविशेषस्य विद्यमानत्वात् । यत्र पुनरेकोपासनस्यैव स्वकामितानेकफलसाधकत्वं तत्र तेनैव कार्यसिद्धौ, न वा उपासनानां समुच्चयो नास्तीत्यर्थः ॥ ६० ॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥

एकफलसाधकानामुपासनानां भिन्नभिन्नस्थलेष्वाम्नातानां भिन्नाङ्गयुक्तानामङ्गेषु यथाश्रयभाव, यदङ्गं यत्राम्नातं तदङ्गविशिष्टं

तदेवोपासनं कार्यं, न त्वन्यत्राम्नातानामन्यत्रोपसंहारः कार्यः ॥ ६१ ॥

कुतः ?

शिष्टेश्च ॥ ६२ ॥

तदङ्गानां तत्रैव शासनादन्यत्रोपसंहारे प्रमाणाभावात् ॥ ६२ ॥

समाहारात् ॥ ६३ ॥

ज्ञानमार्गे सर्वावतारधर्माणां ब्रह्मणि समाहारात् सर्वधर्मविशिष्टब्रह्मोपासनं कार्यम् । तद्ब्रह्मैवावताररूपमित्येकस्मिन्नवतारेऽवतारान्तरधर्माणामप्युपसंहारे बाधकं नास्तीत्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

ऐश्वर्यवीर्यादिगुणानां सर्वावतारेषु साधारण्यं श्रूयत इत्येकस्मिन्नवतारे सर्वावतारधर्मोपसंहारो युक्त इत्यर्थः ॥ ६४ ॥

नन्वेवमुपासनं किं नित्यं ? न, किन्त्वैच्छिकमित्याह ।

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

एकस्मिन्नवतारे सर्वावतारयुक्तोपासनं न वा, तथा रुचिश्चेत्कर्तव्य, न तु नियमतः । तेषां रूपाणां नियततया तत्सहभावश्रवणाभावात् ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

उपासनस्य फलं दर्शनम् । तत्तु स्वधर्मविशिष्टैकावतारस्य भवति, न तु सर्वावतारधर्मविशिष्टस्य । अतो दर्शनाद्धेतोर्भक्तिमार्गीयस्य स्वधर्मविशिष्टैकावतारोपासनं युक्तमित्यर्थः । सर्वोपासनानां फलं दर्शनमिति सूत्रकृताऽन्ते तद्धेतोक्तम् ॥ ६६ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

तृतीयाध्यायस्य चतुर्थः पादः ।

पुरुषार्थोऽतःशब्दादिति बादरायणः ॥ १ ॥

पुरुषार्थो भगवानेव । अतःशब्दाद्, अतः परं नान्यदणीयस्ह्रीयस्तःपदघटितश्रुतिवाक्यादित्यर्थः ॥ १ ॥

अत्र कर्मवादी प्रत्यवतिष्ठते ।

शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥२॥

विष्णोरिज्यत्वेन कर्मशेषत्वात् कर्माङ्गदेवतास्वरूपज्ञानं यागे फलातिशयहेतुरिति पुरुषसम्बन्ध्यर्थवादरूपं वेदान्तेष्वात्मनिरूपणम् । यथाऽन्येषु द्रव्यगुणकर्मस्वर्थवादः । यस्य पर्णमयी जुहूर्भवतीत्यादि द्रव्यनिरूपणार्थमर्थवादः । यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति संस्कारेऽर्थवादः । यत्प्रयाजाऽनुयाजा इज्यन्त इत्यादि कर्मनिरूपणेऽर्थवादः । तद्वत् । अतो विष्णुस्तुतेरर्थवादरूपत्वेनाङ्गप्रशंसाद्वारेण कर्मण एव प्रशंसारूपत्वात् कर्मण एव फलसाधकत्वं न भगवज्ज्ञानस्येत्यर्थः ॥ २ ॥

ननु तमेव विदित्वा मुनिर्भवतीत्यादिश्रुतौ ज्ञानवतः सर्वत्यागकथनात् पूर्वोक्तं न युक्तमित्याशङ्क्याह ।

आचारदर्शनात् ॥ ३ ॥

वशिष्ठप्रभृतीनां ब्रह्मज्ञानिनामग्निहोत्राद्याचरणदर्शनान्न ज्ञानस्य कर्मबाधकत्वं सम्भवतीत्यर्थः ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

जनकादीनां ब्रह्मविदां 'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे' इत्यादिकर्मकरणनिरूपकश्रुतेर्हेतोर्न ज्ञानस्य कर्मबाधकत्वम् ॥४॥

समन्वारम्भणात् ॥ ५ ॥

ते विद्याकर्मणी समन्वारभेते इति श्रुतौ ज्ञानकर्मणोः साहित्येन फलारम्भकत्वदर्शनान्न पूर्वोक्तम् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

वशिष्ठो ब्रह्मेत्यनेन ज्ञानवतो ब्रह्मत्वेन वरणकथनाज्ज्ञानस्य कर्माधिकारसम्पादकत्वमेव । बाधकत्वं तु सुदूरनिरस्तम् ॥ ६ ॥

ननु यदहरेवेत्यादिश्रुत्या त्यागस्यापि विधानात् कर्मतत्त्यागयोरैच्छिको विकल्पोऽङ्गीकार्यो नाङ्गाङ्गिभाव इत्याशङ्क्याह ।

नियमाच्च ॥ ७ ॥

यावज्जीवमग्निहोत्रविधाननियमाद्, आश्विनं धूम्रललाममित्यादिश्रुतौ कर्माकरणे प्रायश्चित्तविधानाच्च कर्मकरणनियम एव श्रुतेरभिमतो, न तु तत्त्याग इत्यर्थः । त्यागविधेः कर्माशक्तविषयकत्वं व्यवस्थापनीयमिति भावः । अतो ब्रह्मज्ञानस्य कर्मशेषत्वेन निरूपणात् कर्मैव फलसाधकत्वात् कर्तव्यं, न तु तत्त्यागे केवलज्ञानात् फलं सिद्ध्यतीति जैमिनिमते प्राप्ते ॥ ७ ॥

उच्यते ।

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥८॥

तुः पक्षव्यावर्तनार्थः । स वा अयमात्मा सर्वस्य वशीत्यादिश्रुत्या भगवान् सर्वापेक्षयाऽधिक उपदिश्यतेऽतः कर्मसाम्यमपि न वक्तु शक्यम् । तदङ्गत्वं तु दूरपरास्तम् । अत्र विश्वासार्थमाचार्यः स्वानुभवं प्रमाणयति । बादरायणस्यैवं तद्दर्शनात् । एवं कर्मादिभ्य आधिक्येनैव तस्य भगवतो भक्तिमार्गस्य च तत्सम्बन्धिसर्वात्मभावस्य च दर्शनाद् अनुभवादित्यर्थः ॥ ८ ॥

आचारदर्शनादित्यस्योत्तरमाह ।

तुल्यं तु दर्शनम् ॥ ९ ॥

यथा जनकादीनां कर्मकरणाचारस्तथा शुकभरतादीनां कर्मत्यागाचारः । तथाचाचारदर्शनस्य तुल्यत्वान्न ज्ञानं कर्माङ्गमित्यर्थः ॥ ९ ॥

ननु जनको ह वैदेह इति जनकस्य कर्मकरणनिरूपकश्रुतिमाहात्म्यात् कर्मकरणाचारदर्शनं त्यागाचारदर्शनादधिकबलमित्याशङ्क्याह ।

असार्वत्रिकी ॥ १० ॥

ब्रह्मविदां सर्वेषामेव कर्मकरणनिरूपणाभावात् कुत्र चिज्जनकादौ कर्मकरणनिरूपिका श्रुतिरसार्वत्रिकी । य एतद्ध स्म वै इति कर्मत्यागनिरूपिका श्रुतिर्दृश्यते । अतो न सर्वेषां कर्मकरणनियम इत्यर्थः ॥ १० ॥

ननु तेषां ब्रह्मवित्त्वेऽप्येकेषां कर्मत्याग एकेषां कर्मकृतिरिति विभागे किं नियामकमित्याशङ्क्याह ।

विभागः शतवत् ॥ ११ ॥

एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेर्भगवदानन्दस्य सर्वत्र विद्यमानत्वेऽपि मानुषाद्यधिकारभेदेन तत्तदानन्ददानाद् यथा मानुषानन्दादारभ्याक्षरानन्दपर्यन्तं शतोत्तरमानन्दोत्कर्षरूपो विभाग उक्तस्तथा प्रकृतेऽपि येषु भगवदनुग्रहोत्कर्षेणान्यभावराहित्यं सर्वथा लौकिकभावराहित्यं व्यसनावस्थेति यावत्, तेषु सर्वथा कर्मत्यागः । येषु भगवदनुग्रहस्य न्यूनत्वं, तेषु लौकिकभावसद्भावाद् व्यसनावस्थाया असम्भवेन कर्मत्यागोऽपि नास्तीति विभाग उपपद्यत इति भावः । व्यसनावस्थायामेव कर्मपरित्याग इति तु भक्तिवर्द्धिन्यादिग्रन्थे निर्णीतम् । अत्र निर्गुणब्रह्मणो यद्गणितानन्दत्वमुक्तं, तत्तु लयात्पूर्वानुभवमादाय । यतः पुरुषाधिकारत्वात्तस्यैवानन्दभोगे तारतम्यं गणसंख्यया सूचितम् । ब्रह्मणि लये तु भोक्तृत्वाभावान्नानन्दतारतम्यम् । अग्रे त्वानन्दमात्रावशेषात् संख्या नास्ति । तर्हि पूर्णत्वं स्यादिति चेत्, पूर्णत्वस्यापि धर्मत्वेन निर्धर्मके तदसम्भवात् । पूर्णत्वं तु सधर्मकत्वात् पुरुषोत्तम एव । तस्य ब्रह्मानन्दापेक्षयाऽऽधिक्यं त्वचिन्त्यशक्त्यावसेयम् ॥ ११ ॥

तद्वतो विधानादित्यस्योत्तरमाह ।

अध्ययनमात्रवतः ॥ १२ ॥

वेदाध्ययनमात्रवतः कर्मण्यधिकारो, न तु ब्रह्मविदोऽपीत्यर्थः ॥ १२ ॥

यच्चोक्तमग्निहोत्रादिविधायकश्रुतिषु कर्मकरणनियमदर्शनं तत्त्यागे बाधकमिति, नियमाच्चेतिसूत्रेण, तत्राह ।

नाविशेषात् ॥ १३ ॥

न कर्मणा न प्रजयेत्यादिश्रुतिषु मोक्षप्राप्तौ त्यागदर्शननियमाविशेषान्न कर्मनियमो बाधक इत्यर्थः ॥ १३ ॥

अथाग्रहेण, ब्रह्मिष्ठो ब्रह्मा भवतीत्यत्र ब्रह्मिष्ठपदेन ब्रह्मज्ञानवानेवोच्यते, न वेदाध्ययनमात्रवानित्युच्येत, तत्रापि ब्रूमः ।

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

दर्शपूर्णमासावेतादृशौ यत्र ब्रह्मविदपि ब्रह्मत्वरूपार्त्विज्याधिकारीति दर्शपूर्णमासस्तुतये, न तु तत्र तस्याधिकारोऽभिप्रेतः । ब्रह्मज्ञाने कर्मापक्षयात्कर्षस्य पूर्वमुपपादितत्वात् ॥ १४ ॥

नन्वेष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानितिश्रुत्या ब्रह्मविदः कर्मकरणे प्राप्तगुणदोषयोर्निषेधः क्रियते । तथा च तस्य कर्मकरणमावश्यकमित्याशङ्क्याह ।

कामकारेण चैके ॥ १५ ॥

कामकारेण परानुग्रहार्थमिच्छामात्रेण यत्करणं तेन प्राप्तगोर्गुणदोषयोर्निषेधार्थमिदं वाक्यमेके शाखिनः पठन्ति । न त्वेनत्कथनेन करणनियमप्रसक्तिरित्यर्थः । परानुग्रहार्थमिच्छामात्रेण यत्कर्मकरणं, न तस्माद्गुणदोषयोः प्रसक्तिः । इदन्तु, पृथग्घ्यप्रतिबन्धः फलमित्यनेन पूर्वमुक्तम् । तादृशकर्मणो भक्तित्वमेव, न कर्मत्वमित्यग्रे, स्तुतिमात्रमितिसूत्रे व्युत्पादयिष्यते । ब्रह्मविदो हि यज्ञाङ्गद्रव्यानां भगवदुकत्वं ज्ञात्वा यजनं कुर्वन्तीति, न तत् कर्मरूपं भवति । भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित इति सन्दर्भोक्तकर्मलक्षणव्याप्तेः । अत एव सन्दर्भेऽप्युक्तं, तदीयाराधनं तु गुणा एवेति । तस्मात् कर्मत्वाभावादेव कर्मसम्बन्धिगुणदोषयोरप्राप्तिः । किन्तु भगवदीयाराधनरूपा भक्तिरेव सेति ज्ञेयम् ॥ १५ ॥

उपमर्द्दं च ॥ १६ ॥

एके शाखिनस्तत्र केन कं पश्येदित्यादिनाऽखण्डब्रह्मज्ञाने कर्मनदधिकारादीनामुपमर्द्दं च पठन्तीति ज्ञानस्य कर्माङ्गत्वं सुदूर-

निरस्तं वेदितव्यम् । अखण्डब्रह्मभानं तु ब्रह्मण्येव, न त्विदं ब्रह्मेति सखण्डम् । तत्रोद्देश्यत्वेन प्रपञ्चस्यापि भानात् सखण्डत्वम् ॥ १६ ॥

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

यदहरेव विरजेत् तदहरेव प्रव्रजेदिति श्रुत्या प्रव्रजनविधानादूर्ध्वरेतःसु सन्न्यासिषु कर्माभावोऽङ्गीकार्य इति कर्मशेषत्वं ज्ञाने न सम्भवति । नन्वेवमग्निहोत्रादिकर्मशेषत्वाभावेऽपि ज्ञाने सन्न्यासाश्रमीयकर्मशेषत्वमस्त्वित्याशङ्क्याह । शब्दे हि । ज्ञानस्वरूपं च शब्दैकगम्यं, न युक्तिगम्यम् । श्रुतौ तु तमेवं विद्वानमृतो भवतीति ज्ञानस्य मोक्ष एव फलं श्रूयते । अतो न सन्न्यासाश्रमीयकर्मशेषत्वमपीत्यर्थः । ननु ज्ञानेनैव मोक्षे सन्न्यासवैयर्थ्यमिति चेद्, ब्रह्मविदृव्यतिरिक्तसङ्गस्य भगवद्भावविस्मारकत्वेन त्यागस्य भगवद्भावपोषकत्वेनोपयोगात् फलोपकार्यन्तरङ्गान्तःकरणशुद्धिसम्पादकत्वाच्च ॥ १७ ॥

अत्र पूर्वपक्षमाह ।

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

किं प्रजया करिष्याम इत्यादिश्रुतौ ब्रह्म सि विना प्रजादिसर्वपदार्थानां वैयर्थ्यकथनात् सकलश्रुतिभिर्मोक्ष एव फलत्वेन परामृश्यते । तं परामर्शं कर्मस्वातन्त्र्यवादी जैमिनिरपवदति बाधत इत्यर्थः । यतो, वीरहा वा एष देवानामितिश्रुत्या कर्मत्यागस्य निन्दितत्वेन प्रव्रजननिरूपकश्रुतेरन्धपङ्ग्वादिविषयकत्वं मनुते । तथा सिद्धस्वरूपब्रह्मनिरूपणश्रुतिषु ब्रह्मज्ञानस्याविधेयत्वेन तच्चोदनापि फलत्वेन मोक्षपरामर्शमपवदतीत्यर्थः । अतो जैमिनिसम्मत्या विधिसम्बन्धेन च कर्मैवाऽनुष्ठेयं, न तु मोक्षसाधनत्वेन तत्त्यागादिकमिति प्राप्ते ॥ १८ ॥

उच्यते ।

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

जैमिनेर्गुरुर्बादरायणोऽनुष्ठेयं कर्मापवदतीति मन्यन्तः । कुत । साम्यश्रुतेः । यथा, वीरहेतिश्रुत्या कर्मत्यागकर्तुर्निन्दा श्रूयते, एवं भगवज्ज्ञानरहितस्यापि निन्दा, असुर्या नामेतिश्रुत्योच्यते । वस्तु-

तस्तु, नमेतं वेदानुवचनेनेतिश्रुत्या कर्मणां ज्ञानसापेक्षनोक्तेस्तेषां ज्ञानसाध्यं तच्छेषित्वं च दूरापास्तमिति मन्तव्यम् ॥ १९ ॥

एवं सति पूर्वकाण्डवैयर्थ्यमायातीत्याशङ्क्याह ।

विधिर्वा धारणवत् ॥ २० ॥

कर्मणां विधिर्भक्तिसाधनत्वेनैव कर्मानुष्ठेयमिति तात्पर्येणोच्यते । धारणवत् । यथा योगशास्त्रे समाधिसिद्ध्यर्थं मानस्या मूर्तेर्धारणं साधनत्वेन विधीयते तद्वत् । समाधिसिद्धौ तु, ततः किञ्चन न स्मरेदित्यादिवाक्येभ्यो यथा धारणात्यागस्तथा भक्तिसिद्धौ तु कर्मणां त्याग इति भावः ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

नन्वेष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानितिश्रुत्या ज्ञानिनि विहितनिषिद्धकर्मणोः फलाजनकत्वेन साम्यमुक्तमिति ज्ञानस्य कर्मशेषत्वं नास्तीति यदुक्तं, तन्नोपपद्यते । यत इयं श्रुतिर्ज्ञानस्य स्तुतिमात्रम् । किञ्चानया श्रुत्या ज्ञानिनोऽपि कर्मोपादानात् कर्मकृतिस्वीकारात् । यदि ज्ञानिनां कर्मकरणं न स्यात् तदा तत्कृतगुणदोषाप्राप्त्या निषेधोऽनुपपन्नः स्यात् । प्राप्तिपूर्वकत्वान्निषेधस्य । मात्रपदेन यत्किञ्चिद्गुणदोषसम्बन्धस्तेषामस्त्येवेति सूचितम् । तथाच ज्ञानिनोऽपि कर्मकरणप्रसक्त्या कर्मशेषत्वं ज्ञानस्यायातीति चेन्नैष दोषः । ज्ञानिनः कर्मफलासम्बन्धस्यापूर्वत्वादन्यतः प्राप्त्यभावाद् विधेयत्वमेव, न तु स्तुत्यर्थं तत्कीर्तनम् । नच निषेधस्य प्राप्तिपूर्वकत्वनियमः । सूर्ये नमःकार्याभाव इत्युक्त्या नभःकार्यप्राप्तेरभावमभ्यासात् । ननु लोकसंग्रहार्थं तथापि कर्मकरणं, तन्निर्धारणानियम इत्यत्रोक्तं, तत्कथमुक्तं ज्ञानिनां कर्मकरणाप्रसक्तिरिति । उच्यते । तादृशरीत्या यत् कर्मकरणं, तद् भक्तिरूपमेव । अत एव तत्राकर्म, अप्रतिबन्धः फलमिति । तस्माद् भगवदिच्छया ज्ञानिना कृतस्य कर्मणो भगवदभिप्रेतार्थकरणेन भक्तिरूपत्वेन निष्प्रयोजनतया कृतत्वेन कर्मत्वाभावाद् देवानां भगवदीयत्वेन भजनात् सम्यगेवोक्तं ज्ञानिनः कर्मकरणाप्रसक्तिरिति ॥ २१ ॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २२ ॥

नतु ब्रह्मविद्यानिरूपकाणां, भृगुर्वै वारुणिरित्युपाख्यानानां; पारिप्लवे शंसतीतिश्रुत्या कर्माङ्गशंसनशेषत्वमुच्यते । शंसने च शब्दमात्रप्राधान्येन तदर्थस्य मन्त्रार्थवदप्रयोजकत्वात् कथं ज्ञानस्य कर्मप्राधान्यमिति चेन्न । कर्मापेक्षया ज्ञानस्य विशेषितत्वाद् विशिष्टतया कथनान्न ज्ञानस्य कर्मशेषत्वमित्यर्थः । नच ज्ञानस्य विशिष्टत्वेन कथनमाख्यानेष्वेवेति शङ्क्यम् । आख्यानातिरिक्तश्रुतौ, ब्रह्मविदाप्नोति परमित्यादौ ज्ञानोत्कर्षकथनात् ॥ २२ ॥

नन्वेवमाख्यानश्रुतीनां विद्याप्रतिपादकत्वं न स्यादित्याशङ्क्याह ।

तथा चैकवाक्यतोपबन्धात् ॥ २३ ॥

यथा केवलश्रुतीनां विद्याप्रतिपादकत्वं, तथैवाख्यानश्रुतीनामित्यर्थः । तर्ह्याख्यानिरूपणस्य कोपयोगस्तत्राह । एकवाक्यतोपबन्धात् । आचार्यवान् पुरुषो वेदेतिश्रुत्यैकवाक्यताज्ञानार्थमुपाख्यानरीत्या गुरुशिष्यकथोपबन्धात् । तथाच विद्याया माहात्म्यनिरूपणार्थमाख्यानपूर्वकं निरूपणमित्यर्थः ॥ २३ ॥

पुरुषार्थोऽतःशब्दादित्यारभ्य ज्ञानस्य कर्मानपेक्षत्वं फलसाधने उक्तमिति तत्रैवोपपत्त्यन्तरमाह ।

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥

यतो ज्ञानी ज्ञानेन स्वयं यज्ञात्मको जातोऽत एव जरामर्यमग्निहोत्रेऽग्नीन्धनाद्यनपेक्षोक्ता, तस्यैवं विदुषो यजमानस्येत्यादितैत्तिरीयकश्रुतौ ॥ २४ ॥

नन्वेवं कर्मकाण्डवैयर्थ्यमित्याशङ्क्य कर्मणां ज्ञाने फलोपकारित्वाभावेऽपि स्वरूपोपकारित्वमस्त्येवेत्याह ।

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २५ ॥

सर्वेषां कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानेऽपेक्षाऽस्ति । अन्यथा यज्ञादिनिरूपकश्रुतिवैयर्थ्यं स्यात् । अत एतन्निर्णये सैव श्रुतिः प्रमाणमित्यर्थः । ननु यज्ञादिविधायकश्रुतिबलात् कर्मणामेव ज्ञानद्वारा फलसाधकत्वमस्त्वित्याशङ्क्य दृष्टान्तेन निरस्यति । अश्ववत् । यथा खेटफलसाधकदेशव्यवधायकदेशातिक्रमेऽश्वस्य साधनत्वं, न तु

तद्दर्शितफलासाधपि । तथा कर्मणां ज्ञानोत्पत्तिप्रतिबन्धकान्तःकरणदोषनिरास उपयोगो, न तु ज्ञानफलसिद्धावपीत्यर्थः ॥ २५ ॥

ननु तस्मादेवंविच्छान्तो दान्त इत्यादिना शमादीनामेव ज्ञानसाधनत्वमुच्यते, न तु यज्ञादेरित्याशङ्क्याह ।

शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २६ ॥

आत्मन्येवात्मानं पश्येदिति ज्ञानमार्गीयज्ञानाङ्गतया शमदमादिविधेर्हेतोर्ज्ञानी शमदमाद्युपेतः स्यात् । ज्ञानमार्गे तेषामवश्यानुष्ठेयत्वात् । अन्यथा ज्ञानमवकीर्येत । अतस्तस्मादेवंविदिति श्रुतौ शमदमादीनामुक्तिः । कर्मणां तु बहिरङ्गत्वादनुक्तिरिति ज्ञेयम् । भक्तिमार्गे तु स्वत एव शमदमादयो भवन्ति, तथापि ज्ञानमार्गे तेषामावश्यकत्वाज्ज्ञानी तद्युक्तः स्यादेवेत्यर्थः ॥ २६ ॥

ननु शमादीनां सत्त्वशुद्ध्यर्थमपेक्षणात् तत्र चाहारशुद्धौ सत्त्वशुद्धिरिति श्रुत्याऽऽहारशुद्धेरन्तरङ्गसाधनत्वात् तद्विरुद्धसर्वान्नभक्षणस्य, चाक्रायणे छान्दोग्योपनिषत्सु श्रवणात् सत्त्वशुद्धेरन्तरङ्गसाधनत्वमित्याशङ्क्य सर्वान्नानुमतिश्रुतिव्यवस्थामाह ।

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २७ ॥

आहारदौर्लभ्येन प्राणात्यये प्राप्ते सर्वान्नानुमतिः श्रूयते, न त्वाहारसुलभत्वे । यतश्छान्दोग्योपनिषत्सु चाक्रायणे तथा दर्शनादित्यर्थः । एवञ्च ज्ञानिनोऽप्यनापदि विहितत्यागाच्चित्तमालिन्यं जनयतीति सत्त्वशोधकशमादिकमवश्यमनुष्ठातव्यमित्यर्थः ॥ २७ ॥

अबाधाच्च ॥ २८ ॥

आपदि सर्वान्नभक्षणेन चित्तदोषासम्भवाज्ज्ञाने बाधाभावाच्च न दोष इत्यर्थः ॥ २८ ॥

अपि स्मर्यते ॥ २९ ॥

आपद्यपि दुष्टोऽपि दुष्टान्नभक्षणे पापाभावो, जीवितात्ययमापन्न इत्यादिना स्मर्यते यत्र तत्र पितुरपत्यान्नभक्षणे दोषाभावे किं

षकार्यमित्यर्थः । यतस्तस्य ज्ञानाग्निरेव दोषसत्त्वेऽपि नाशकोऽस्तीतिभावः ॥ २९ ॥

शब्दश्चातोऽकामकारे ॥ ३० ॥

यतो ज्ञानिनो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थोऽनस्तस्य पूर्णदशायां यथेष्टाचरणेऽपि न दोषः । परं तु साधनदशायां कामनिवर्तकः शब्द, एवंविच्छान्तो दान्त इत्यादिरूपः श्रूयते । अतः साधनदशायां शमदमाद्यनापदि शिष्टाभक्षणं सर्वथा तेनानुष्ठेयमितिभावः ॥ ३० ॥

ननु ज्ञानाग्निः सर्वकर्माणीतिस्मृत्या ज्ञानस्य सर्वकर्मनाशकत्वकथनाज्जातज्ञानस्याश्रमकर्माणि न कर्तव्यानीत्याशङ्क्याह ।

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥

यथाऽनापदि शिष्टाभक्षणमेव कर्तव्यं, तथा विहितत्वादाश्रमकर्मापि कर्तव्यमित्यर्थः । अन्यथा विहितत्यागजनितदूषणे चित्तमालिन्यं स्यादितिभावः ॥ ३१ ॥

ननु कृतस्यापि कर्मणो ज्ञानेन नाशात् किमर्थमपार्थकर्म ज्ञानिना कर्तव्यमित्याशङ्क्याह ।

सहकारित्वेन च ॥ ३२ ॥

शमदमादीनां ज्ञानान्तरङ्गसाधनानां सहकारीण्याश्रमकर्माणि । अत आश्रमकर्मरहितैः शमदमादिभिर्ज्ञानं स्थिरीकर्तुमशक्यमतस्तान्यपि कर्तव्यानीत्यर्थः ॥ ३२ ॥

एव ज्ञानमार्गीयाणां ज्ञानस्थैर्यसाधनान्युक्त्वा भक्तिमार्गीयाणां भक्तिसाधनानि श्रवणादीन्यवश्यकर्तव्यानीत्याह ।

सर्वथापि त एवोभयलिङ्गात् ॥ ३३ ॥

यद्यपि भक्तानां श्रवणकीर्तनादीनि कर्तव्यान्येव, तथापि वर्णाश्रमधर्मादिसाधनानां श्रवणादीनां च युगपदुपस्थितौ सर्वथापि त एव श्रवणादय एव कर्तव्याः । नानुध्यायेद् बहून् शब्दान्, अन्या वाचो विमुञ्चथेतिलिङ्गात् । शृण्वन्ति गायन्तीत्यादिस्मृतिलिङ्गाच्चेत्यर्थः ॥ ३३ ॥

अनभिभवं च दर्शयति ॥ ३४ ॥

युगपदुपस्थितौ प्राधान्येन भगवद्धर्मा एव कर्तव्या इत्यत्र गमनान्तरमुच्यते । यतः, सर्वं पाप्मानं तरतीत्यादिश्रुतिः कर्माकरणजदोषैर्भक्तस्यानभिभवं दर्शयतीत्यर्थः ॥ ३४ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥

भगवद्धर्मेभ्य आश्रमधर्मा न्यूना इत्युक्तमुच्यते । अपि तु तद्दृष्टेः, तस्मिन् भगवति दृष्टिरन्यभावराहित्यपूर्वकं भगवद्भावो व्यसनावस्थेतियावत् सा विद्यते यस्य तस्य वर्णाश्रमधर्मा अन्तरा फलप्राप्तौ बाधका इत्यर्थः । व्यसनावस्थापन्नस्य भक्तस्य निरन्तरं भगवद्भावनायुक्तत्वेन भगवद्धर्मकर्मकरणयोर्युगपदुपस्थित्यसम्भवाद् यौगपद्ये कर्मणां त्याग आवश्यकः । अत एव तादृशव्यसनावस्थापन्ना भक्ता निरपेक्षा इत्युच्यन्ते । तानुद्दिश्यैव, मद्भक्तो यादृशः सलिङ्गानाश्रमांस्त्यक्त्वेति भगवतोक्तम् । सापेक्षा अपि भक्ता द्विविधाः, स्वार्थे फलापेक्षा लोकसंग्रहापेक्षाश्च । व्यसनदशापन्नानां स्वार्थापेक्षा नास्त्येव । लोके विषमदृष्टेरभावाल्लोकसंग्रहापेक्षापि नास्ति । अतस्तेषां सर्वथा निरपेक्षत्वम् ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥

अपिशब्देनाश्रमधर्माणामन्तरायत्वे किं वाच्यं, यतो ज्ञानान्तरङ्गसाधनानां वैराग्यादीनामप्यन्तरायत्वं न ज्ञानं न च वैराग्यमित्यादिना स्मर्यते ॥ ३६ ॥

ज्ञानादिभ्यो भक्तेः साधनत उत्कर्षमुक्त्वा फलतोऽप्युत्कर्षमाह ।

विशेषानुग्रहश्च ॥ ३७ ॥

ज्ञानापेक्षया भक्ते विशेषानुग्रहः, अहं भक्तपराधीन इत्यादिना स्मर्यते ॥ ३७ ॥

भक्त्युत्कर्षकथने फलितार्थमाह ।

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३८ ॥

अतः पूर्वोक्तोदाहृतश्रुतिभ्य इतरद् मुक्तेरपि भक्तिमार्गतदीयत्वमेव ज्यायः । हेत्वन्तरमप्याह । लिङ्गाच्चेति । मुक्तानां देहेन्द्रियाद्यभावेन केवलमात्मस्वरूपेणैव ब्रह्मानन्दानुभवः । भक्तानां त्वलौकिकदेहेन्द्रियादिभिः सर्वोत्कृष्टभजनानन्दानुभव इति तदीयत्वमेव सर्वोत्कृष्टमित्यर्थः ॥ ३८ ॥

ननु भक्तिमार्गस्यापि मोक्षसाधनत्वेन तत्र तदीयत्वस्य साधनोत्कृष्टावस्थारूपत्वेन मोक्षान्तरङ्गसाधनत्वमेव । एवञ्च तदीयत्वं न सर्वोत्कृष्टमित्याशङ्क्याह ।

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात-
द्रूपाभावेभ्यः ॥ ३९ ॥

तद्भूतस्य पुष्टिमार्गे तदीयत्वं प्राप्तस्य जैमिनेरप्यतद्भावस्तद्भावराहित्यं न कदाचिदपि । दृढतया कर्ममार्गनिरूपकत्वेन भक्तिसम्बन्धाभावसूचनार्थं जैमिनेर्ग्रहणम् । एवञ्चान्यस्य भक्तिलेशवतः का वार्ता, यदि भगवत्कृपया जैमिनेरपि तदीयत्वं स्यात् तद्भावतिरोधानं कदापि न भवतीति, न तदीयत्वस्य मोक्षसाधनत्वशङ्कालेशोऽपीत्यर्थः । तत्र नियमादयो हेतवः । सदा पश्यन्ति सूरय इति सदापदोक्त्या भक्तानां भगवद्दर्शनं नित्यमेवेति नियम उक्तः । सोऽश्नुते इति श्रुत्या मुक्तस्य ब्रह्मस्वरूपानुभव उच्यते । स च परणैकसाध्य इति तदीयत्वस्य फलरूपत्वात् साधनरूपाभाव उक्तः । फलं हि साधनादुत्तमं भवति । तदीयत्वापेक्षयान्यस्योत्कृष्टस्याभावादपि न तदीयत्वस्य निर्विशेषमोक्षफलकत्वमित्यर्थः ॥ ३९ ॥

ननु ध्रुवादिभक्तानां ध्रुवादिलोकसम्बन्धिभोगस्य भगवदीयत्वस्य फलं ब्रह्मादिलोकाधिकार एवेत्याशङ्क्याह ।

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥४०॥

भगवदीयस्य भगवानाधिकारिकफलं न ददाति । कुतः । आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेति स्मृतिवाक्येन तत्र पतननिरूपणात् । किञ्च तादृशभक्तस्य निरन्तरं साकारभगवदनुभवेनाधिकाराद्यासक्त्यभावेन तादृशफलस्यायोगात् सम्बन्धेऽपि न ददातीत्यर्थः ।

भृत्यादीनां तु कार्यविशेषार्थं तदिच्छानुरोधेन च दानं, नैतावता स-
र्वेभक्तेभ्यस्तद्दानमिति नियमः ॥ ४० ॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४१ ॥

एके भक्ता आधिकारिकफले पतनमात्रे न दोषः, किन्तूपपूर्वं पतनं भक्तिसम्बन्धाभावादिति वदन्ति । परमत्राधिकारसमाप्तौ भगवदनुग्रहाच्छाप सम्भवति । मुक्तौ तु तदसम्भवान्महापतनमेव सति भावः । एवं मुक्तिस्वरूपं निरूप्य भक्तिमार्गोत्कर्षार्थमाह । भावमशनवत् । भक्तिमार्गे तु साक्षात्प्रभुसम्बन्धाभावेऽपि भगवदानन्दभोगश-न्यते । ननु साक्षाद्भगवत्स्वरूपानुभवो जीवस्य न सम्भवतीत्याश-ङ्क्याह । तदुक्तम् । सोऽश्नुते सर्वान् कामान्, सह ब्रह्म समश्नुत इत्यादिश्रुतिषु तथोक्तमित्यर्थः ॥ ४१ ॥

ननूत्कृष्टभगवद्भावे भगवत्स्वरूपानुभवे वा सम्पन्ने गृहत्यागः कर्तव्यो न वेति संशये फलस्य सिद्धत्वान्न कर्तव्यो गृहत्याग इति भाते, उच्यते ।

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥

उभयथापि भगवद्भावमात्रे स्वरूपानुभवे वा गृहाद् बहिर्गमनं त्यागः कर्तव्यः । त्वं तु सर्वं परित्यज्येति स्मृतेरुद्धवविदुरादीनां तथा-चाराच्चेत्यर्थः ॥ ४२ ॥

नन्वेवं पुष्टिमार्गीयफलस्य त्यागात्मकसाधनजन्यत्वमापन्नमि-त्यादाशङ्क्याह ।

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥

पुष्टिभक्तस्य स्वामिनो भगवत एव फलश्रुतेर्न साधनत्वेन वि-हितत्वेन च त्यागः कर्तव्यः । साधनदशायां गृहादीनां भगवद्भाव-बाधकत्वाभावेनावश्यं त्यागो भवतीति भावः । अत्रेति विचारवत्ता-त्वेन भक्तिमार्गसिद्धान्तसत्त्वात् तथाभोक्तम् ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥

औडुलोमिराचार्यस्तु जीवानां भगवल्लीलार्थमेव प्रकटितत्वेन

लीलोपयोगस्य तेषां त्यागं विनाऽसम्भवाद् भक्तस्य सर्वत्यागपूर्वकं भगवत्सन्निकटगमनं तद्वार्त्विज्यम् ऋत्विक्कर्मैव मनुते । यथा ऋत्विजां कर्मणि प्रयासो यजमानकार्यार्थं तथाऽत्रापि भगवल्लीलासम्पादनार्थमेव तेषां त्यागादिकमित्यर्थः । भक्तानाम् ऋत्विक्त्वनिरूपणस्य तात्पर्यान्तरमाह । तस्मै हि परिक्रीयते । तस्मै यजमानाय स्वकार्यकारणार्थम् ऋत्विक् परिक्रीयते वरणेन स्वीक्रियत इत्यर्थः । एवं प्रकृते स्वीयतल्लीलासम्पादनार्थं वृता भक्तास्तल्लीलानुभवविरोधिगृहादिकं त्यक्त्वा भगवत्सन्निकटं गच्छन्तीत्यर्थः ॥ ४४ ॥

श्रुतेश्च ॥ ४५ ॥

भक्तिरस्य भजनमित्यादिश्रुतिरूपप्रमाणादप्ययं सिद्धान्तो ज्ञेयः ॥ ४५ ॥

ननु वरणश्रुतिर्भगवत्प्राप्तौ वरणातिरिक्तसाधनान्तरं निषेधति । तस्मादेवंविदित्यादिश्रुतिस्तु साधनान्तराणि निरूपयति । एवं श्रुतिविप्रतिषेधे प्राप्ते मर्यादापुष्टिभेदेन तयोर्व्यवस्थामाह ।

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

जीवानां भगवदङ्गीकारो मर्यादापुष्टिभेदेन द्विधा । तत्र श्रुतौ शमदमादिसहकार्यन्तरविधिर्मर्यादापक्षेणोच्यते । पुष्टिमार्गे तु वरणातिरिक्तसाधनानपेक्षणात् तद्वतो भगवद्विषयकपरमस्नेहवतस्तृतीयं साधनं मानसिकम् । कायिकवाचनिकमानसिकभेदेन त्रिविधसाधनेषु मानसिकस्याऽव्यवहितत्वात् तद्ग्रहणम् । तथाच तादृशस्य भक्तस्य मानसिकसाधनमपि विध्यादिवज्ज्ञेयम् । यथा स्नेहवतो भक्तस्य भगवत्कार्ये प्रवृत्तौ विधिरर्थवादो वाऽप्रयोजकः । तस्य स्वत एव प्रवृत्तिसम्भवात् । तथा मनसैवाप्तव्यमितिश्रुतिबोधितं मानसिकं साधनं भावद्वाराप्रयोजकमित्यर्थः । भगवदङ्गीकारबलेन तस्य स्वत एव प्राप्तिसम्भवात् । भगवति मनोनिवेशस्तु भावस्वाभाव्यादेव, न तु विधिबलेन । एवं मानसिकसाधनस्य पुष्ट्यप्रयोजकत्वकथनेन कायिकवाचनिकयोरप्रयोजकत्वमर्थादेव सिद्धम् ॥ ४६ ॥

ननु बहिस्तूभयथेत्यादिना पूजाभावयुक्तस्य गृहत्यागावश्यकत्वमुक्तम् । तच्छान्दोग्योपनिषदुक्तोपसंहारविरुद्धम् । तत्रान्ते, कुटुम्बे शुचौ देशे स्वाध्यायमधीयान इति गृहस्थाश्रमस्यैव कथनादित्याशङ्क्य तत्तात्पर्यमाह ।

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

त्यागे वाङ्मनसयोरेव भगवति विनियोगः । गृहस्थाश्रमे तु कुटुम्बसाहित्येन सेवाकरणात् सर्वेन्द्रियाणां भगवद्विनियोगः, परिजनकृतार्थता चाधिका सम्पद्यत इति गृहिणोपसंहारः कृत इत्यर्थः । मर्यादामार्गीयगृहिव्यवच्छेदार्थं तुः । पूर्वोक्तत्यागावश्यकत्वं तु व्यसनदशायामेव । तादृशाधिकारस्य दुर्लभत्वेन पूर्वं गृह एव स्थित्वा भजनं कर्तव्यमित्यत्रोक्तम् । पूर्णाधिकाराभावे त्यागधर्माणामनिर्वाहात् कर्मत्यागेन विकर्मजदोषप्रसक्तेश्च ॥ ४७ ॥

किञ्च ।

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

सन्न्यासिनो यथा मौनानीहादयो धर्मा उपदिष्टास्तथात्र गृहिण इतरेषामप्युपदेशः कृतः । आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्येत्यादिना । अतः सन्न्यासिधर्मापेक्षयाऽऽधिकधर्माणामुपदेशाद् गृहिणोपसंहारो युक्तः ॥ ४८ ॥

ननु तत्र शुचौ देशे स्वाध्यायमधीयान इतिकथनात् कथं सर्वेन्द्रियाणां भगवत्सेवापरत्वं सम्भवतीत्याशङ्क्याह ।

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

यतो भगवता सहान्वयं सम्बन्धं प्राप्य वर्तते । अतो गृहस्थाश्रमधर्मैः स्वाध्ययनादिभिर्भगवद्भावमनाविष्कुर्वन् भगवद्भजनं कुर्यादित्याशयेन शुचौ मे धर्मा उक्ता इत्यर्थः ॥ ४९ ॥

वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकतत्करणसमयमाह ।

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

यथा भगवद्भावगोपनार्थं वैदिककर्मकरणं, तथा लौकिकस्या-

ध्यनावश्यकत्वात् करणम् । परं तु भगवत्कार्याप्रतिबन्धेनैहिकमपत्योत्पादनतत्संस्कारादिकं कार्यम् । ननु तेषां बाध एवास्त्वित्याशङ्क्याह । तद्दर्शनात् । धार्मिकान् विद्ध्यादिति श्रुतौ धार्मिकपुत्रविधानदर्शनाद् गृहस्थाश्रमतद्धर्माणां बाधाभावेऽपि भगवत्सेवासमयाऽप्रतिबन्धेन तेषां करणमित्यर्थः ॥ ५० ॥

नन्वेवंप्रकारेण भजनं कुर्वतो भक्तिमार्गीयस्य भगवद्रसानुभवात्मकं फलं भवति, न वेत्याशङ्क्याह ।

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥

एवम्भूतस्य गृहिणो जीवन्मुक्तस्य मुक्तेर्यत्फलं भगवद्रसानुभवस्तस्यानियम एव । अत्र हेतुमाह । तदवस्थेत्यादि । न स पुनरावर्तत इति श्रुत्या मोक्षावस्थाया एव नियमः क्रियते । न तु पुष्टिमार्गीयफलस्य । जीवन्मुक्तिदशा तु तस्यौत्सर्गिक्येवेति भावः । अतस्तथेत्यर्थः । अत्र भक्तस्य भगवद्रसानुभवानियम उक्तः, स तु भक्तिमार्गीयसर्वाभिप्रायेण । तत्र शुद्धपुष्टिभक्तस्य परमानुग्रहभाजनत्वान्मुक्तेर्यत्फलं भगवद्रसानुभवस्तदेव तादृशसाधनसम्पत्तौ नियमेन भवति। येषां भक्तानां शुद्धपुष्टिमार्गीयसाधनं न सम्पन्नं, तेषां तु साधनाभावादेव न विलक्षणभगवत्सम्बन्धात्मकं फलं भवति, मोक्षस्तु भवत्येव सर्वेषामित्यभिप्रायेण मुक्तिफलानियम उक्तो, न तु शुद्धपुष्टिसाधनसम्पत्तावपि न मुख्यं फलं भवतीत्यभिप्रायेणेति ज्ञेयमिति ॥

यद्वा, नन्वेवंरीत्या भक्तिमार्गीयगृहिणो भगवद्रसानुभवात्मकं फलमेतज्जन्माव्यवधानेन भवति न वेत्याशङ्क्याह । एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः । एवम्भूतस्य गृहिणो जीवन्मुक्तस्य मुक्तेर्यत्फलं भगवद्रसानुभवस्तस्यानियम एव । एतज्जन्मोत्तरं जन्मान्तरव्यवधानेन वेत्यनियम इत्यर्थः । जन्मान्तरव्यवधानं तु तेषां मदिच्छानुरोधिभगवदिच्छातो भवति । तादृशभक्तानामेव तादृशीच्छा भवति, यदस्माकं जन्मान्तरं भवतु । तेनास्माकं भगवद्भजनरसानुभवो भवतु । लोकानां शिक्षणेनास्माभिः कृतार्थता सम्पादनीया तदुपर्यनुग्रहोऽपि सम्पद्यतामित्याकारकतदिच्छानुरोधेन भ-

गवदिच्छया तेषां जन्मान्तरं भवति। परं तज्जन्म मुक्तिरूपं दुःखाऽस्पृष्टं, न तु बन्धरूपम्। न कर्मबन्धनं जन्म वैष्णवानां च विद्यते। विष्णोरनुचरत्वं च मोक्षमाहुर्मनीषिणः। यथा सौमित्रिभरताविति पाद्मोक्ते। आर्तभक्तानां त्वेतादृशीच्छा न भवति, तेषां भगवद्विप्रयोगस्य सोढुमशक्यत्वादिति ज्ञेयम्। अनियमे हेतुमाह। तदवस्थावधृतेस्तदवस्थावधृतेः। न स पुनरावर्तत इति श्रुत्या मोक्षावस्थाया एव नियमः क्रियते, न तु पुष्टिमार्गीयफलस्य। जीवन्मुक्तदशा तु तस्यौत्सर्गिक्येवेति भावः। अतस्तथेत्यर्थः। आवृत्तिरध्यायसमाप्तिसूचिका ॥ ५१ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥

समाप्तश्चायं तृतीयोऽध्यायः।

अथ चतुर्थाध्यायस्य प्रथमः पादः ।

तुरीयेऽध्याये फलं विचारयंस्तस्यान्तरङ्गसाधनरूपश्रवणादिषु विचारयति । तत्र, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यनेन विहितं श्रवणादिकं सकृत् कर्तव्यमसकृद्वेति संशये सकृत्करणेऽपि शास्त्रार्थसम्पादनसम्भवात् सकृदेव कर्तव्यं, नासकृद् गौरवादिति प्राप्ते, उच्यते ।

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

श्रवणादीनामावृत्तिरेव श्रुतितात्पर्यविषयः । कुतः । असकृदुपदेशात् । छान्दोग्ये श्वेतकेतूपाख्याने, ऐतदात्म्यमिदं सर्वमित्यारभ्य तत्त्वमसीत्यन्तोपदेशवाक्यस्य नवकृत्व उपदेशात् ॥ १ ॥

अत्रैव प्रमाणान्तरमाह ।

लिङ्गाच्च ॥ २ ॥

श्रुतेरनुमापकत्वात् स्मृतिर्लिङ्गमित्युच्यते । तथाच, 'यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम्' इतिस्मृतेरपि श्रवणादीनामावृत्तिरेव फलसाधिकेति ज्ञेयम् । अत्र चक्षुर्यथैवेति दृष्टान्तेनापि श्रवणादीनामावृत्तेर्दृष्टद्वारैव फलसाधकत्वं सूचितम् । अतः श्रवणादिकमसकृत् कर्तव्यमिति सिद्धम् ॥ २ ॥

एवं श्रवणादीनामावृत्तौ ज्ञानिनां फलं विचारयति ।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

ज्ञानिनो हि भगवन्तमात्मरूपेणोपासते । एवं निरन्तरमुपासने क्रियमाणेऽनेकजन्मभिस्तेषां हृदये तथैव भगवान् स्फुरति । तदा स्वानन्दांशरूपाप्यायिभावात् स्वाभेदेनैव तमनुभवन्ति । एव स्थितौ किञ्चित्कालविलम्बेन प्रारब्धक्षये तत्रैव प्रविशन्ति । एतदेवाह । आत्मेति तूपगच्छन्ति । आत्मेत्युपासनात् तमेवोपगच्छन्ति प्राप्नुवन्तो-

त्यर्थः । एतादृशाः सर्वोपकारिण इति परार्थमपि ज्ञानं भगवता तेषु दत्तमित्युत्तमाधिकारिण्युपस्थिते ज्ञानमुपदिशन्त्यपीत्युपदेशोऽपि तेषां फलानुभवमध्यपातीत्युपदिशन्ति चेत्युक्तम् ॥ ३ ॥

ननु ब्रह्मणा आत्मत्वेन ज्ञानमुपासनार्थं, गुरौ भगवत्त्वेन ज्ञानमपीति तस्य फलत्वमनुपपन्नमित्याशङ्क्याह ।

न प्रतीकेन हि सः ॥ ४ ॥

प्रतीकेन अन्यस्यान्यरूपेणोपासनेन स मोक्षो न भवति । अतस्मिंस्तद्बुद्धिरूपे प्रतीके भेदज्ञानस्य विद्यमानत्वात् । भेददृष्ट्याभिमानेनेतिवाक्ये भेददर्शनस्य संसारप्राप्तिफलकत्वनिरूपणात् ॥ ४ ॥

ननु सर्वं खल्विदं ब्रह्म, आत्मैवेदं सर्वमित्यादौ सर्वत्र ब्रह्मदृष्टिः प्रतीकात्मिका मोक्षसाधनत्वेनोक्ता । अतः प्रतीकोपासनस्य निर्विशेषब्रह्मप्राप्तिलक्षणमोक्षस्य साक्षादसाधनत्वकथनमनुपपन्नमित्याशङ्क्याह ।

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

सर्वस्य वस्तुनो ब्रह्मात्मकत्वेन तत्र ब्रह्मदृष्टेः प्रतीकत्वाभावेन ज्ञानाधिकारोत्कर्षात् सा स्वत एव भवतीत्यर्थः । पूर्वोक्तवाक्येषु त्वनुवादमात्रं, न विधानम् । अतः प्रतीकोपासनस्य न साक्षान्मुक्तिसाधनत्वमिति सम्यगेव ॥ ५ ॥

ननु छान्दोग्ये, प्राचीनयोग्यकं त्वमात्मानमुपास्से इत्यादित्यमेव भगवो राजन्निति होवाचेति, पुनरिन्द्रद्युम्नप्रश्ने, वायुमेव भगवो राजन्नित्यादावाकाशाऽऽपप्रभृतय आत्मत्वेनोपासनाविषया उक्ताः । तथैवासौ वा आदित्यो देवमध्वित्युपक्रमे उच्यते, य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्त इति । यद्यपि, सर्वं खल्विदं ब्रह्मेति श्रुतौ सर्वानुवादेन ब्रह्मत्वबोधनान्न प्रतीकत्वं, तथाप्यत्र तु प्रत्येकमादित्यादौ ब्रह्मत्वोक्तेः प्रतीकत्वमेव । तथोपासनेन फलकथनात् प्रतीकोपासनाया अपि फलसाधकत्वं सूचितम् । एवञ्च पूर्वत्र सर्वं खल्विदं ब्रह्मेतिवाक्ये वस्तुतः सर्वस्य ब्रह्मत्वं नाभिप्रेतं, किन्तु तथा प्रतीकोपासनम् । एवं तथापि फलदर्शनात् प्रतीकोपासनस्य फलासाधकत्वकथनमनुपपन्नमित्याशङ्क्याह ।

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

भगवतः स्वरूपभूतशक्त्यात्मकादित्यादौ या ब्रह्मत्वमतय उक्तास्ताः साकारव्यापकस्य ब्रह्मणः प्रत्येकमङ्गमपि तथोपासितं फलदमिति ज्ञापनार्थम् । युक्तं चैतत् । ब्रह्मण आनन्दमात्रकरपादमुखोदरादेरङ्गमपि तादृशमिति नात्र प्रतीकोपासनमित्यर्थः ॥ ६ ॥

एवं सूत्रषट्केन श्रवणाद्यावृत्तौ ज्ञानिनां सर्वत्र जगति प्रत्येकपदार्थेषु च भगवद्रूपत्वेन भानलक्षणफलमुपपाद्याग्रिमसूत्रषट्केन पुष्टिभक्तानां भगवत्स्वरूपाविर्भावात्मकं फलं तत्प्राप्तौ साहजिकमुत्कटस्नेहात्मकं साधनं चाह ।

आसीनः सम्भवात् ॥ ७ ॥

उत्कटस्नेहात्मकसाधनसम्भवाद् भगवांस्तदधीनः संस्तद्धृदय आसीनो भवति ॥ ७ ॥

एवं बहिःप्राकट्यमुक्त्वान्तरपि तदाह ।

ध्यानाच्च ॥ ८ ॥

उत्कटभावेन निरन्तरस्मृतिरूपध्यानादपि हृदि प्रकटः सन्नासीनो भवतीत्यर्थः ॥ ८ ॥

एवमेतादृशभक्तेच्छयैव बहिरन्तश्च भगवत्प्राकट्यमित्युक्त्वा लीलाविष्करणमपि भक्तभावाधीनमित्याह ।

अचलत्वं चापेक्ष्य ॥ ९ ॥

भक्तेच्छामपेक्ष्याचलत्वं, चकाराच्चलत्वमपीत्यर्थः ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

केचन भक्ताः स्वरूपदर्शननिरपेक्षास्तत्स्मरणानन्दमनुभवन्तस्तेनैव विस्मारितापवर्गान्तफलास्तिष्ठन्ति । चकारात्कुर्वन्ति कीर्तनादिपराणां ग्रहणम् । तदुक्तम् । अथ ह वाव तव महिमामृतसमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिन इति ।

अनेन श्रवणजन्यभगवत्परत्वमुक्तम् । अथवा ' अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रिय ' इत्यादिस्मृतयः पूर्वोक्ते भगवतो भक्तवश्यत्वे प्रमाणत्वेनोक्ता एतेन सूत्रेण ॥ १० ॥

ननु बहिर्भगवदाविर्भाववतो भक्तस्यान्तःसदाविर्भाववतश्च न्यूनाधिकभावोऽस्ति, न वेति विशयेऽन्तर्भगवदाविर्भावस्योत्कृष्टत्वात् तद्वतो भक्तस्याधिक्यमितिप्राप्ते, उच्यते ।

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

यत्र भक्तेष्वेकाग्रता एकस्मिन् प्रकटे भगवत्स्वरूपे ग्राहकचित्तधारा, न त्वन्तर्बहिर्विशेषोऽन्तं तत्र भक्तेषु बहिर्भगवदाविर्भावयुतस्यान्तस्तदाविर्भावयुतस्य च भावे तद्विषये स्वरूपे च विशेषाभावान्न्यूनाधिकभावो नास्तीत्यर्थः । तथाच भक्तेष्वेकाग्रतैवाधिक्यसम्पादिका, न तु बहिराविर्भावोऽन्तराविर्भावो वेतिभावः ॥ ११ ॥

ननु पूर्वमन्तःप्रकटस्य भगवत उत्कटभावाद्यदा बहिराविर्भावस्तदा भक्तस्य पूर्वमिदं स्वरूपमन्तरन्वभूवमधुना बहिरनुभवामीति ज्ञानं भवति, न वेति संशयेऽन्तरनुभवबहिरनुभवयोरत्यन्तवैलक्षण्यात् तादृशज्ञानं भवत्येवेति प्राप्ते, उच्यते ।

आप्रायणात् तत्रापि हि दृष्टम् ॥ १२ ॥

प्रायणं हि सतामहमिति वाक्यात् प्रायणं नाम परमपुरुषार्थरूपं पारलौकिकं फलमुच्यते । एवं सति प्रायणं मर्यादीकृत्य तेषां सैवावस्था नित्या । भगवत्स्वरूपे आन्तरत्वबाह्यत्वानुसन्धानरहिताः केवलस्वरूपैकनिष्ठास्तिष्ठन्तीत्यर्थः । ननु प्रायणानन्तरं भगवति सायुज्यं भविष्यतीत्याशङ्क्याह । तत्रापि हि दृष्टमिति । तत्रापि प्रायणेऽपि पूर्ववद्भगवता सममालापाऽवलोकनर्थामचरणकमलस्पर्शादिकं दृष्टमेव तस्य फलं भवति, नत्वपूर्वं सायुज्यादिकम् । यतोऽयं दृष्टविषयोऽतो युक्तमेव तथेति हिशब्दार्थः ॥ १२ ॥

आवृत्तिरसकृदुपदेशादितिसूत्रषट्केन पूर्वं ज्ञानिनां ज्ञानमिश्रभक्तानां च श्रवणाद्यावृत्त्या सर्वत्र जगति भगवद्रूपत्वेन ज्ञानमुक्तम् । जातज्ञानानां तेषामेवाधुना सूत्रत्रयेण जीवन्मुक्तिदशा निरूप्यते।

तत्र मर्यादाभक्तेर्ज्ञानपूर्वकत्वनियमाज्ज्ञानात् पूर्वं सञ्चितकर्मणो सत्त्वात् तदुत्तरमपि कर्मकरणदर्शनाच्च तेषां कर्मणां भोगैकनाश्यत्वनियमान्मुक्तिरनवसरपराहतेत्याशङ्कायामाह ।

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

तस्य ब्रह्मज्ञानस्याधिगमे प्राप्तौ सत्याम् उत्तराघस्याऽश्लेषः पूर्वाघस्य विनाशश्च भवतीत्यर्थः । कुतः । तद्व्यपदेशात् । यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इतिश्रुतेः । 'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा' इतिस्मृतेश्चेत्यर्थः ॥ १३ ॥

ननु पापस्य शास्त्रे निन्दितत्वात् तन्निवृत्तिर्ज्ञानेन भवतु, सुकृतस्य तु शास्त्रोक्तसाधनजन्यत्वात् तन्नाशो भोगेनैवेति तथैव मुक्तिरनवसरपराहतेति विशेषाशङ्कायां पूर्वोक्तन्यायमेवातिदिशति ।

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

इतरस्य पुण्यस्याप्येवं पूर्वस्याश्लेष उत्तरस्य विनाश इत्यर्थः । उभे हैवैष तरतीतिश्रुतेः, ज्ञानाग्निः सर्वकर्माणीतिस्मृतेश्च तद्व्यपदेशादित्यर्थः । ननु तादृशज्ञानिनो मर्यादामार्गीयत्वात् कदाचिद् भरतजयादिवत् सङ्गदोषेण भगवद्भावात् पाते सति विहितनिषिद्धकर्मसम्बन्धे पूर्वोक्तदोषनादवस्थ्यमित्याशङ्क्य सूत्रैकदेशेन परिहरति । पाते त्विति । एवमसंश्लेष इत्यनुवर्त्यते । मर्यादामक्तौ भगवद्भावाच्च्युतिः पात इत्युच्यते । अप्यर्थे तुः । तथाच, न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्तीतिवाक्याद् तेषां पातो न सम्भवति । तथापि भगवदिच्छया मर्यादामार्गीयत्वाद् भगवांश्चेत् तथा करोति, तथाप्युत्तरसुकृतदुष्कृतकर्मणोरसंश्लेष एवेत्यर्थः ॥ १४ ॥

ननु देहस्य कर्मजत्वाद् भक्तिमिश्रज्ञानेन कर्मनाशाद्देहनाशे सति ज्ञानिनः पथ्यवनानुपपत्तिर्जिज्ञासोश्च तादृशगुरोरभावेन गुरूपसत्त्यादसम्भवेन मार्गोच्छेदापत्तिश्चेत्याशङ्क्य परिहरति ।

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

पूर्वे पूर्वसूत्राभ्यां ज्ञाननाश्यत्वेन प्रोक्ते सुकृतदुष्कृतकर्मणी ते अनारब्धं भोगायतनाख्यं कार्यं याभ्यां तादृशे एव नश्येते, नाशिते। ननु ज्ञानं सर्वकर्मदहनेऽसहायशूरमिति पूर्वमुक्तं, तत कथमुच्यतेऽनारब्धकार्यकर्मनाशकमिति । तत्राह । तदवधेः । तत् ज्ञानेनारब्धकार्यकर्मादहनम् अत्रधेः कार्यमात्रस्य पूर्वावधिरूपभगवदिच्छात इत्यर्थः । तथाचाखिलकर्मदहनसर्वसमर्थस्यापि ज्ञानस्य भगवदिच्छया प्रतिबन्धात् प्रारब्धकार्यविषये सङ्कोच इत्यर्थः ॥ १५ ॥

ननु जीवन्मुक्तानां प्रारब्धकर्मभोग एव कर्तव्यो, न त्वन्यदप्यग्निहोत्रादि । दृश्यते च जनकादीनां तत्करणमा।अतः कृतस्य कर्मणः फलावश्यम्भाव इत्याशङ्क्य तेषां कर्मकरणप्रयोजनमाह ।

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

तुशब्दः पक्षव्यावर्तकः । तेषामग्निहोत्रादिकरणं तत्कार्यायैव प्रारब्धकर्मनाशायैव । तेषामग्निहोत्रादिकारकं प्रारब्धमस्तीति तद्भोगार्थं कर्म क्रियते, न त्वपूर्वफलार्थम् । कुतः । तद्दर्शनात् । यथाकारी यथाचारी तथा भवति, साधुकारी साधुर्भवति पापकारी पापो भवति, पुण्यः पुण्येन कर्मणा भवति, पापः पापेनेतिश्रुतिदर्शनात् । एतच्छ्रुत्या पूर्वपुण्यस्य कर्मणोऽग्रिमपुण्यकर्मजनकत्वमुक्तमिति तद्भोगार्थमेवाग्रिमकर्मकरणमित्यर्थः । एवं मर्यादामार्गस्य मर्यादयैव मोक्षप्रतिबन्धो मर्यादयैव ज्ञानेन तन्नाश इति निरूपितम् ॥१६॥

पूर्वम्, आसीनः सम्भवादिति सूत्रषट्केन पुष्टिभक्तानां भगवदाविर्भावात्मकं फलमुक्तम्।अधुना तेषामेव ज्ञानिवैलक्षण्येन भगवत्कृपया भोगं विनैव प्रारब्धाप्रारब्धकर्मनाशपूर्वकं सद्य एव भगवद्भोगात्मकं फलमुच्यते सूत्रत्रयेण ।

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

एकेषां पुष्टिभक्तानामुभयोः प्रारब्धाप्रारब्धयोर्भोगं विनैव नाशो भवति। कुतः । अतः श्रुतेरित्यर्थः । यतः कर्मणो ज्ञाननाश्यत्वनिरूपकाया ज्ञानिनः प्रवचनादिनिरूपणेन ज्ञानानाश्यप्रारब्धाख्यकर्मक्षेपकश्रुतेर्भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यत इत्यादिरूपाया अन्यापि श्रुतिः पठ्यते । तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां.

द्विषन्तः पापकृत्यामिति ॥ १७ ॥

ननु ब्रह्मज्ञानेनानाश्यस्य प्रारब्धस्य भोगैकनाश्यस्य पुष्टिमार्गीये भक्ते कथं कृपया नाश इत्यसम्भावनां निराकर्तुं कैमुतिकन्यायेनाह ।

यदेव विद्ययेति हि ॥ १८ ॥

भगवज्ज्ञानशक्तेरंशभूता जीवनिष्ठा विद्या । एवञ्च यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवतीतिश्रुत्या भगवच्छक्त्यात्मकविद्यासम्बन्धाज्जीवकृतकर्मणो वीर्यवत्तरत्वं यत्र तत्र साक्षाद्भगवत्कृपया प्रारब्धनाशे किमु वक्तव्यमित्यर्थः ॥ १८ ॥

एवं पुष्टिमार्गे प्रतिबन्धाभावमुपपाद्य फलमाप्तिं निरूपयति ।

भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते ॥ १९ ॥

इतरे स्थूललिङ्गशरीरे क्षपयित्वा त्यक्त्वा । अथ भगवल्लीलानुभवयोग्यालौकिकदेहसम्बन्धानन्तरं भोगेन सम्पद्यते । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेतिश्रुतेरित्यर्थः ॥ १९ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

चतुर्थाध्यायस्य द्वितीयः पादः ।

पूर्वपादान्ते, इतरे क्षपयित्वेत्यनेन पुष्टिभक्तः स्थूललिङ्गशरीरे क्षपयित्वा भगवदानन्दं प्राप्नोतीत्युक्तम् । तत्र सर्वेन्द्रियाणां युगपदेव भगवति लयः, प्रणाड्या वेति संशये प्रणाड्यैवेति वक्तुं प्रणाडीमाह।

वाङ् मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

भक्तस्योत्कटभावेन भगवदिच्छया भगवदाविर्भावेन तद्दर्शने जाते, दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुम्बन्निवास्येन भुजैरिवाश्लिष्यन्निति रीत्या सर्वेन्द्रियैः स्वरूपानुभवेच्छायां प्रथमं तेन सहालापेच्छा भवति । ततो मानसिकभावेन भगवदाविर्भावो जात इति मनसि प्रभुनैकट्यमस्तीति तेन सम्बन्धे तत्प्राप्तिर्भविष्यतीति पूर्वं वाग् मनसि सम्पद्यते लीयत इत्यर्थः । कुतः । तद्दर्शनात् । पूर्वोक्तरीत्या तद्दर्शनानन्तरमेवम्भावजननाद् दर्शनस्य हेतुत्वम् । अत एव छान्दोग्ये वाङ् मनसि सम्पद्यत इति श्रुतिः । दर्शनाभावे वेण्वादिशब्दश्रवणेनापि सर्वेन्द्रियैः स्वरूपानुभवेच्छा जन्यत इति शब्दाच्चेत्युक्तम् ॥ १ ॥

अत एव सर्वाण्यनु ॥ २ ॥

अत एव दर्शनाच्छब्दाच्च हेतोः सर्वाणीन्द्रियाणि, अनु वाग्लयानन्तरं मनसि सङ्गतानि भगवदानन्देन सम्पद्यन्त इत्यर्थः ॥२॥

तन्मनः प्राण उत्तरात् ॥ ३ ॥

सर्वेन्द्रिययुक्तं मनः प्राणे सम्पद्यते । कुतः । उत्तरात् । श्रुतिवाक्यादित्यर्थः । स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयत इत्युक्त्वाऽग्रे हेतुमाह, प्राणबन्धनं हि सोम्य मन इति । अतस्तथेत्यर्थः ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

स सर्वेन्द्रिययुक्तमनःसहितः प्राणोऽध्यक्षे प्रकटे भगवति सम्पद्यत इत्यर्थः। कुतः। तदुपगमादिभ्यः। तस्य भगवत उपगमोऽभ्युपगमः पुष्टिमार्गेऽङ्गीकारः। आदिपदाद् भगवद्वशीकरणसमर्थः स्नेहो भगवत्प्राप्तिप्रतिबन्धकसर्वार्थत्यागस्तत्प्रसादानुकूलं भजनं च संगृह्यते ॥ ४ ॥

एवं पुष्टिभक्ते सर्वेन्द्रियलयप्रकारो निरूपितः। ज्ञानिनः, तदधिगमेत्यादिसूत्रत्रयेण जीवन्मुक्तिदशा निरूपिता। अधुना तस्येन्द्रियाणां लयोऽपेक्षित इति तल्लये प्रकारान्तरमाहैकेन सूत्रेण।

भूतेषु तच्छ्रुतेः ॥ ५ ॥

मर्यादाभक्तानामिन्द्रियाणि भूतेषु लीयन्ते। कुतः। तच्छ्रुतेः। यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयत इति श्रुतेः ॥५॥

ननु मर्यादामार्गीयौ भक्तो ज्ञानी च भवतः। पूर्वोक्तनिर्णयस्तु ज्ञानिविषय एव। मर्यादाभक्तं तु कदाचिद् भगवान् पुष्टावङ्गीकरोतीत्याशङ्क्याह।

नैकस्मिन् दर्शयतो हि ॥ ६ ॥

एकस्मिन् ज्ञानिनि नियमेन मर्यादायामङ्गीकार इति नियमो न, किन्तु मर्यादाभक्ते ज्ञानिनि चोभयोरेव मर्यादायामङ्गीकार इति नियम इत्यर्थः। न तु कदाचिन्मर्यादाभक्तं पुष्टावपि प्रवेशयतीत्यर्थः। कुतः। दर्शयतो हि। यतो याज्ञवल्क्यार्तभागौ तथैव दर्शयतः। तथाहि। यत्रायं पुरुषो म्रियत उदस्मात् प्राणा उत्क्रामन्त्याहो नेत्यार्तभागप्रश्ने याज्ञवल्क्योऽत्रैव समवलीयन्त इत्युक्त्वाग्रे, यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येतीत्यारभ्य रेतश्च निधीयत इत्यन्तमुक्तवान्। ततः क्वायं पुरुषो भवतीति प्रश्ने, उभाभ्यां विचारितमुत्तरमुच्यते, तौ ह यदूचतुः कर्म हैव तदूचतुरित्यादिना। अत्र प्राणानामत्रैव लयोक्त्या मुक्तविषयेयं श्रुतिरिति युक्तम्। अमुक्तस्य

प्राबल्यासम्भवात् । तथाच मुक्तस्य कर्मणि स्थितेरसम्भवात् कर्मशब्देन मर्यादैव ग्राह्या । तथाच मुक्तिविषयौ ज्ञानिमर्यादाभक्तौ कर्मणि मर्यादायामेव तिष्ठतो, न तु कदाचित् पुष्टावपीति तयोरभिप्रायो ज्ञायते । तथाच ज्ञानिमर्यादाभक्तयोरुभयोर्मर्यादायामङ्गीकारनियमो, न त्वेकस्मिन्नपीति भावः ॥ ६ ॥

नन्वेवं मर्यादापुष्ट्योर्नियतविषयत्वे किं नियामकमित्याकाङ्क्षायां तयोः स्वरूपमेव तादृशमित्याह ।

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥७॥

मर्यादामार्गे हि साधनक्रमेणैव मुक्तिः, पुष्टिमार्गे तु श्रवणाद्यतिरिक्तज्ञानकर्मादिसाधनं विनैव मुक्तिप्राप्तिरिति नियतम् । तदाह । आसृत्युपक्रमात् समाना । सृतिर्जीवानां भगवतः पृथग्भूय संसरणम् । तस्या उपक्रममारभ्य मर्यादीकृत्य मोक्षपर्यन्तं साधनेनैव मुक्तिरेवरूपा मर्यादा समाना मध्ये नान्यथा भवतीत्यर्थः । एवं पुष्टिमार्गे अमृतत्वं चानुपोष्य । अत्रोपोषणपदं साधनमात्रोपलक्षकम् । तथाच साधनमात्रमकृत्वा केवलकृपया अमृतत्वमपि तन्मार्गे नियतमित्यर्थः ॥ ७ ॥

नन्वेवमपि मर्यादामार्गीयशुद्धजीवस्य मोक्षसम्भवाद् याज्ञवल्क्यार्तभागाभ्यां कर्म हैव तत्प्रशशंसतुरित्यनेन तन्मुक्तेः कर्मत्वेन कथनं कुत इत्याशङ्क्याह ।

तदाऽपीतेः संसारव्यपदेशात् ॥ ८ ॥

तदा पुष्टिफलदशायाम् अपीतेर्मर्यादामार्गीयमोक्षस्य संसारव्यपदेशात् तन्मुक्तौ भगवत्स्वरूपानन्दानुभवाभावात् संसारतुल्यतैवेति तात्पर्यात् तथा निरूपितमित्यर्थः ॥ ८ ॥

ननु पुष्टिमार्गीय तत्त्वमेतादृशं यत्र मुक्त्यात्मकफलस्यापि संसारत्वेन गणना, तर्हि तस्यैवाभ्यर्हितत्वात् स्तुतेर्युक्ततया मुक्तिसाधकवाक्यानां प्रतारकत्वापत्तिरित्याशङ्क्याह ।

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

पुष्टिमार्गीय तत्त्वं सूक्ष्मं दुर्ज्ञेयमित्यर्थः । तस्यानुभवैकवेद्य-

त्वाद्नुभवस्य च दुर्लभाधिकारिविषयत्वादन्याविषयमेव तत्। मोक्षस्य च शुद्धाधिकारिमात्रविषयत्वात् स्तुतेरबाधितविषयत्वात् नेदावैदकप्रमाणस्य न प्रतारकत्वमितिभावः। नन्वेवमतिनिगूढपुष्टितत्वमङ्गावे किं मानमित्याशङ्क्याह। प्रमाणतश्च तथापलब्धेः। यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति श्रुतौ पूर्वार्द्धेन मनोवागगम्यत्वेन दुर्ज्ञेयत्वमुक्त्वोत्तरार्द्धेन विद्वानिति तत्सत्ता बोध्यते। अतस्तद् दुर्ज्ञेयत्वेनैव श्रुतिबोधितमिति तामङ्गावे न विवदितव्यम्। चकारात् तादृशभक्तानुभवोऽपि मानमिति सूच्यते॥ ९॥

नन्वेतादृशपुष्टितत्वसत्त्वे यथा ब्रह्मविदः स्वमार्गीयं तत्त्वमुपदिशन्ति, तथैतेऽपि कुतो नोपदिशन्तीत्याशङ्क्य तत्र निदानमाह।

नोपमर्द्दनातः॥ १०॥

ऐश्वर्यभावे ह्युपदेशनम्। तेषां तु विरहदशा भगवत्सङ्गमदशा चेति दशाद्वयम्। तत्र विरहे तद्भावेनान्यभावानामैश्वर्यभावादीनामुपमर्द्दनोपदेशो न सम्भवति। सङ्गमे तु अतः पुर प्रकटानन्दात्मकप्रभुस्वरूपाद्भेनोत्तदानन्दानुभवनिमग्नचित्तत्वेनान्येभ्यः सख्यादिभ्योऽप्युपदेशो न सम्भवतीत्यर्थः॥ १०॥

ननु रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीतिश्रुते रसात्मकभगवत्स्वरूपानुभवेनानन्दिनानां तेषामानन्दनिरोधानात्मकविरहदुःखं न सम्भवतीत्याशङ्क्याह।

अस्यैव चोपपत्तेरूष्मा॥ ११॥

अस्यैव आनन्दात्मकभगवत एव धर्म ऊष्मा विरहताप इत्यर्थः। नन्वानन्दात्मकस्य दुःखरूपो धर्मः कथमित्याशङ्क्याह। उपपत्तेरिति। श्रृङ्गारस्थायिभावात्मकप्रभुस्वरूपस्यान्तरनुभावकत्वात् सोऽपि सुखस्वरूप एवोपपद्यते, न तु दुःखात्मकः। निर्वेदग्लान्यादिरूपव्यभिचारिभावात् तथा भानमात्रमित्यर्थः॥ ११॥

ननु, न पश्यो मृत्युं पश्यति नरो तद्दुःखमित्यादिश्रुतेर्निर्वेदग्लान्यात्मकदुःखस्याप्यसम्भव इत्याशङ्क्य श्रुतेस्तात्पर्यमाह।

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

अत्र श्रुतौ शारीरमेव दुःखं प्रतिषिद्ध्यते, न तु शृङ्गारव्यभिचारिभावात्मकं, रोगसदृशपाठादितिभावः ॥ १२ ॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥

एकेषां शाखिनां प्रभुस्वरूपप्राप्त्यनन्तरं दुःखनिवृत्तिरूपोऽर्थः स्पष्टः पठ्यते, रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीत्यादिना ॥ १३ ॥

स्मर्यते च ॥ १४ ॥

भगवद्भावस्य मरणहेतुत्वं, तेनैव जीवनं, तद्भावस्याखिलदुर्लभत्वं च श्रीभागवते स्मर्यते । ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः । ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहमित्यारभ्य धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चनेति भगवद्वचनेन । एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः । वाञ्छन्ति यं भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथारसस्येति श्रीमदुद्धववचनेन ॥ १४ ॥

नन्वेवं भगवदाविर्भावस्तद्दर्शनेन विरहोत्कण्ठ्य, ततः प्रभुप्राकट्येन पूर्णानन्ददानमित्यादिकं वैकुण्ठेऽपि दुर्लभं कुत्र दृष्टमित्याकाङ्क्षायामाह ।

तानि परे तथा ह्याह ॥ १५ ॥

तान्युक्तानि वस्तूनि परे वैकुण्ठादप्युत्कृष्टे श्रीगोकुले श्रीगोवर्द्धने वसन्तीति शेषः । तथाहि, ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयास इत्यादिका श्रुतिराह ॥ १५ ॥

ननु परमकृपया कमपि भक्तं नित्यलीलायां प्रवेशयति चेत् तदा कश्चित्काले तत्र स्थापयित्वा तत्कर्म नियोजयति, उत तत्रैव स्थापयति नित्यमित्याशङ्कायां सिद्धान्तमाह ।

अविभागो वचनात् ॥ १६ ॥

अत्र भक्तस्याविभाग एव ततः । कुतः । वचनात् । तद्विष्णोः

परमं पदं सदा पश्यन्ति सूरय इतिश्रुतेरित्यर्थः। एवं पुष्टिभक्तफलानुभवप्रकारो निरूपितः॥ १६॥

भूतेषु तच्छ्रुतेरित्यनेन ज्ञानित इन्द्रियाणां भूतेषु लयो निरूपितः। अधुना निरिन्द्रियस्य तस्योत्क्रमणप्रकारं पञ्चसूत्रैराह।

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया॥ १७॥

स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति श्रुतेस्तस्यात्मन ओकः स्थानं हृदयं तदग्रं प्रथमं ज्वलति। पूर्वमप्रकाशमानमपि तदा प्रकाशते। तेन प्रकाशितं द्वारं गमनमार्गो यस्य तादृश उत्क्रामति। तस्य हैतस्य हृदयस्याग्रं प्रद्योतत इत्यादिश्रुत्याऽप्ययमेवार्थ उक्तः। इदं सर्वं जीवसाधारणं निष्क्रमणम्। विदुषस्तु मार्गे विशेषमाह। शताधिकया। एकशततम्या, शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका, तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्तीतिश्रुत्युक्तया निष्क्रामति। यतः स हार्दानुगृहीतो हृदयस्थितेन भगवताऽनुगृहीतः। तदनुग्रहे हेतुः। विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्चेति। ब्रह्मविद्यासामर्थ्याद्। तस्या विद्यायाः शेषभूता अङ्गभूता या गतिः प्रव्रजनरूपा तत्र या भगवतोऽनुस्मृतिः स्मरणं तत्संबन्धाद् यो भगवदनुग्रहस्तेन तया निष्क्रामतीत्यर्थः॥ १७॥

नन्वोकोऽग्रज्वलनादेः सर्वसाधारण्येऽपि यथा हार्दानुग्रहाद्विदुष एव सुषुम्णयोत्क्रमणमुक्तं, तथाऽथैतैरेव रश्मिभिरूर्ध्वमाक्रामतीतिश्रुत्युक्तं रश्मिद्वारमाक्रमणं सर्वसाधारणं, विदुष एव वेति संशये सिद्धान्तमाह।

रश्म्यनुसारी॥ १८॥

विद्वानेव रश्मिद्वारा गच्छतीत्यर्थः॥ १८॥

ननु विदुष उत्क्रमणे यथा हार्दानुग्रहकृतो विशेषस्तथा दिवायनात्मककालविशेषकृतोऽपि भविष्यतीति शङ्कां निराकुर्वन्नहोरात्रकृतविशेषमाशङ्क्य निराकरोति।

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावि-त्वाद्दर्शयति च ॥ १९ ॥

निशि विदुष उत्क्रमणं नेति चेन्न । कुतः । सम्बन्धस्य यावद्देहभावित्वात् । अनुग्रहहेतुभूतो यो गत्यनुस्मृतिसम्बन्धस्तस्य यावद्देहभावित्वात् तज्जन्यानुग्रहस्य सत्त्वात् तद्बलेन कालस्याप्रयोजकत्वमित्यर्थः । एतत् श्रुतिरेव दर्शयति । एतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति ॥ १९ ॥

अतोऽयनकृतोऽपि विशेषो नास्तीत्याह ।

अतश्चायनेऽपि दक्षिणे ॥ २० ॥

उत्क्रमणनियमो विदुषो नास्तीत्यर्थ ॥ २० ॥

ननु श्रीभगवद्गीतास्वनावृत्तिमार्गमुपक्रम्याग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्, तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इत्युक्त्या विदुषोऽपि कालविशेषापेक्षास्तीत्याशङ्क्याह ।

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २१ ॥

अयं कालनियमो योगिनं प्रति स्मर्यते, न ब्रह्मविदं प्रति । एते योगसाङ्ख्ये स्मार्ते । श्रौतस्य तु ज्ञानमार्गस्यासहायशूरत्वान्नान्यसापेक्षत्वमिति भावः ॥ २१ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां चतुर्थाध्यायस्य द्वितीय. पाद. ॥ ४ ॥ २ ॥

चतुर्थाध्यायस्य तृतीयः पादः ।

पूर्वपादे ब्रह्मविद उत्क्रमणप्रकारमुक्त्वा मोक्षमार्गमस्मिन् पादे विचारयति । तत्र श्रुतावर्चिरादिमार्गेण गमनमुक्तम् । तज्ज्ञानमार्गीयमर्यादाभक्तयोरुभयोरुत ज्ञानिन एवेति संशये निर्णयमाह ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

अर्चिरादिमार्गेण प्रायशो ज्ञानमार्गीय एव गच्छति कश्चिच्च तु मर्यादाभक्तोऽपि । तस्य प्रायः सद्यो मुक्तेरेव सम्भवादिति भावः । कुतः । तत्प्रथितेः । तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिना ज्ञानमार्गीयस्यैव तत्रोक्तेःकथनात् ॥१॥

नन्वर्चिरादिमार्गनिरूपकच्छान्दोग्यश्रुतौ वायुलोको न पठ्यते । कौशीतकिश्रुतौ त्वग्निलोकानन्तरं स पठ्यत इत्युभयश्रुत्यैवैकएवार्चिरादिमार्गः प्रतिपाद्यत इति वायुलोकोपसंहारावश्यकत्वे छान्दोग्ये कुत्र तस्योपसंहार इत्याकाङ्क्षायामाह ।

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

छान्दोग्ये मासेभ्यः संवत्सरं संवत्सरादादित्यमित्यत्र संवत्सरादुत्तरं वायुलोको निवेशयितव्यः । कुतः । अविशेषविशेषाभ्याम् । अर्चिरारभ्य संवत्सरान्तानां भूसम्बन्धित्वेनाविशेषात् तन्मध्ये वायुर्न निवेशनीयः । भूलोकादुपर्यन्तरिक्षलोकस्तदुत्तरं द्युलोकः । एवञ्च, वायुरन्तरिक्षस्याधिपतिरिति श्रुतेः, सूर्यो दिवोऽधिपतिरिति श्रुतेरेतयोः पौर्वापर्ये विशेषो हेतुरस्तीति सूर्यलोकात्पूर्वं वायुलोको निवेशनीय इत्यर्थः ॥ २ ॥

तडितोऽधि वरुणः सम्बन्धात् ॥ ३ ॥

चन्द्रमसो विद्युतमित्यत्रोक्तविद्युल्लोकात् परतो वरुणलोको निवेशनीयः । कुतः । सम्बन्धात् । तडितो जलसम्बन्धित्वाद् घनगर्जनात्सम्बन्धः ॥ ३ ॥

वरुणाच्चाधीन्द्रप्रजापती ॥ ४ ॥

वरुणलोकात् परमिन्द्रलोकः प्रजापतिलोकश्च निवेशनीयः। अत्र सम्बन्धादित्यनुवर्तते । एवं चेन्द्रस्य सर्वदिक्पालेषु मुख्यत्वात् प्रजापतेः सर्वदेवाधिपतित्वात् सम्बन्धोऽस्तीति भावः ॥ ४ ॥

ननु श्रुतौ विद्युल्लोकानन्तरं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीत्युक्त्वा, यावद्वचनं वाचनिकमितिन्यायेन येषां विद्युदनन्तरमेव ब्रह्मप्राप्तिस्तेषामातिवाहिकसम्बन्धो, येषां तु तदनन्तरं वरुणेन्द्रप्रजापतिलोकप्राप्तिस्तेषां तत्सम्बन्धो न भविष्यतीत्याशङ्क्याह ।

आतिवाहिकास्तल्लिङ्गात् ॥ ५ ॥

एकस्मिन्नेव मार्गेऽन्यलोकानामुपसंहारान्मार्गभेदे प्रमाणाभावात् प्रजापतिलोकोत्तरमातिवाहिका उपसंहर्तव्याः । कुतः । तल्लिङ्गात् । तत्पुरुषोऽमानव इत्यत्र पुरुषस्य ब्रह्मसम्बन्धित्वं लिङ्गमुच्यते । एवञ्च यथान्यलोकप्राप्तिर्विद्यावलात् तथा ब्रह्मप्राप्तिः, किन्तु तदीयपुरुषसम्बन्धेनैवेति ज्ञाप्यते ॥ ५ ॥

ननु देवयानमार्गे प्राप्तानां तेषामिह न पुनरावृत्तिरस्तीत्यादिश्रुतिभ्योऽवश्यं ब्रह्मविदैव सद्यो मुक्तिं परित्यज्य तत्तल्लोककामना कुतः । अथ च, यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्, सर्वं तद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा, स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छतीति भगवद्वाक्याद् भक्तस्याप्येतद्विषयिणी वाञ्छा फलं च सम्भवति । तद्भक्तिरसं हित्वा कुत इत्याकाङ्क्षायामाह ।

उभयव्यामोहात्तत्सिद्धेः ॥ ६ ॥

देवयानमार्गस्यापि भगवतैव सृष्टत्वाद्धीनाधिकारिणां तदयोग्यत्वादुत्तमाधिकारिणां चेत् तत्कामना न स्यात् तदा मार्गवैयर्थ्यं स्यात् । एवञ्च स्वकृतमार्गसाफल्याय भगवानेव काँश्चन ज्ञानिनो मर्यादाभक्तांश्च व्यामोहयतीति तत्कामनातस्तेषां तत्फलभोग इत्यर्थः ॥६॥

ननु विद्युल्लोकाद् वरुणादिलोकप्राप्तिर्यस्य भवति तस्य वैद्युतः पुरुष एव ब्रह्मप्रापक, उत स्वत एव ब्रह्म प्राप्नोतीति संशये निर्णयमाह ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ७ ॥

नहि ब्रह्मप्राप्तिः स्वतो भवति, किन्तु ब्रह्मसम्बन्धिपुरुषसामर्थ्येन। एवञ्च यतो ब्रह्मप्राप्तिस्ततस्तत्सम्बन्धिपुरुषेणैव। कुतः। तच्छ्रुतेः। तान् वैद्युतात् पुरुषो मानस एत्य ब्रह्मलोकानागमयतीतिश्रुतेः। अत्र वैद्युतलोकमागच्छतीति वैद्युत उक्तो, नतु तल्लोकवासित्वेन। एत्येतिकथनात्। अत एव भगवन्मनोऽभिलषितं भक्तं प्रापयतीति मानस उक्तः॥ ७॥

अत्र स एतान् ब्रह्म गमयतीत्यत्र ब्रह्मपदेन कार्यब्रह्मलोक, उत परब्रह्मैवेतिसंशये परब्रह्मणो व्यापकत्वाद् गन्तव्यत्वानुपपत्तेर्ब्रह्मलोकपरमिति वादरिमतमुपन्यस्यति।

कार्यं वादरिरस्य गत्युपपत्तेः ॥ ८ ॥

स एतान् ब्रह्म गमयतीत्यत्र कार्यं ब्रह्मोच्यते। कुतः। अस्य गन्तुस्तत्रैव गमनमुपपद्यते, न तु परब्रह्मणि व्यापकत्वादितिभावः॥८॥

विशेषितत्वाच्च ॥ ९ ॥

ब्रह्मलोकान् गमयतीतिश्रुतौ बहुत्वेन लोका विशेषिताः। तेषु ब्रह्मलोकेषु पराः परावतो वसन्तीतिश्रुतौ वासकर्तृत्वेन गन्तारो विशेषिता इति कार्यं ब्रह्मैव ग्राह्यं, न परं ब्रह्म तस्यैकत्वात्॥ ९॥

तर्हि तत्र ब्रह्मपदप्रयोगे को हेतुरित्याशङ्क्याह।

सामीप्यात्तु तद्व्यपदेशः ॥ १० ॥

तल्लोकप्राप्तौ लोकान्तरप्राप्तिं विनैव परब्रह्मप्राप्तिरिति ब्रह्मसामीप्याद् ब्रह्मत्वेन व्यपदेशः कृतः॥ १०॥

नन्वाब्रह्मभुवनाल्लोकाः पुनरावर्तिन इति वाक्यात् ततः पुनरावृत्तिः श्रूयते। श्रुतौ तु, तेषामिह न पुनरावृत्तिरस्तीत्युच्यते। अतः परब्रह्मैवात्र ग्राह्यमित्याशङ्क्याह।

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥११॥

कल्पावसाने कार्यब्रह्मलोकात्यये नाशे तदध्यक्षेण चतुर्मुख-

ब्रह्मणा सह मतो ब्रह्मणः परमीश्वरं प्राप्नोतीत्यतोऽपुनरावृत्तिश्रुतेर्न विरोधः । कुतः । अभिधानात् । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ' इति श्रुतौ तथाभिधानादित्यर्थः ॥ ११ ॥

स्मृतेश्च ॥ १२ ॥

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमितिस्मृतेः पूर्वोक्त एवार्थः ॥ १२ ॥

एवं प्राप्ते सिद्धान्तमाह ।

परं जैमिनिर्मुख्यत्वात् ॥ १३ ॥

स एतान् ब्रह्म गमयतीति ब्रह्मपदेन परं ब्रह्मैवेति जैमिनिराचार्यो मन्यते । कुतः । मुख्यत्वात् । ब्रह्मपदस्य मुख्या वृत्तिः परब्रह्मण्येव, गौणी त्वन्यत्र । तथा च मुख्यसम्भवे गौणार्थस्यायुक्तत्वात् ॥ १३ ॥

दर्शनाच्च ॥ १४ ॥

स एतं देवयानं पन्थानमापद्येत्यादिश्रुतौ, स प्रजापतिलोकं स ब्रह्मलोकमिति प्रजापतिलोकात् पार्थक्येन ब्रह्मलोककथनदर्शनादित्यर्थः ॥ १४ ॥

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १५ ॥

ब्रह्मविदाप्नोति परमित्युक्त्वा तद्विवरणवाक्ये, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यनेन भगवता सह सर्वकामोपभोगलक्षणा प्रतिपत्तिरुच्यते । सा कार्यब्रह्मलोके न सम्भवतीत्यर्थः । अतोऽत्र परमेव ब्रह्म प्राप्तमिति भावः ॥ १५ ॥

क्रममुक्त्यधिकारिणः प्रारब्धभोगानन्तरममानवपुरुषप्रापिताः परं ब्रह्म प्राप्नुवन्तीत्युक्तम् । अथार्चिरादिलोकप्राप्तान् सर्वानेवामानवः पुरुषो ब्रह्म गमयत्युत कांश्चिदेवेति विचारे, ब्रह्मप्रापणार्थमेव तस्य नियुक्तत्वादर्चिरादेर्ब्रह्मलोकमार्गत्वात् तत्र गतान् सर्वानेव ब्रह्म प्रापयतीति प्राप्ते, उच्यते ।

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ॥ १६ ॥

उपास्यरूपाणि वस्तुनोऽब्रह्मरूपाणि, तेषु ब्रह्मत्वेनोपासनं वेदबोधितत्वात् सफलमिति ज्ञात्वा य उपासते ते प्रतीकालम्बनाः । एवमपि वेदबोधितत्वेनोपासनायाः कृतत्वात् तेषामर्चिरादिलोकप्राप्तावपि तानमानवः पुरुषो ब्रह्म न नयति, किन्तु तद्भिन्नान् । ये वस्तुतः सर्वं ब्रह्मेति ज्ञात्वा तत्त्वेनोपासते तानेव नयतीति बादरायण आचार्यो मनुते । कुतः । उभयथा दोषात् । वस्तुनो ब्रह्मरूपेऽब्रह्मत्वनिश्चय उपासनार्थं, तत्र ब्रह्मत्वज्ञानं चेत्युभयथा दोषात् तेषां न ब्रह्मप्राप्तावधिकार इति, न तान् प्रापयतीत्यर्थः । योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणेति तादृशभावनाया निषिद्धफलकथनात् । एवं ज्ञानमार्गीये भेदद्वयं निरूप्य भक्तिमार्गीयव्यवस्थामाह । तत्क्रतुश्च । स भगवद्भजनलक्षणः क्रतुर्यस्य स तत्क्रतुः । स तु भक्तिबलात् स्वयमेव परं ब्रह्म गच्छतीत्यर्थः ॥ १६ ॥

पूर्वम्, अविभागो वचनादित्यनेन पुष्टिभक्तस्य लीलापरिकरादविभागो भवतीति फलमुक्तम् । तस्यैव ज्ञानिफलाद्विशेषं वक्तुमधिकरणारम्भः । तत्र सर्वाण्युपास्यरूपाणि शुद्धब्रह्मरूपाण्येवेति तदुपासकानां परप्राप्तिरेवेत्युक्तम् । तत्र ज्ञानमार्गीयाणामुपासकानां भक्तिमार्गीयाणां चाविशेषेणैव परप्राप्तिर्भवत्युत कश्चन विशेषोऽस्तीति संशये, उभयोरपि ब्रह्मोपासकत्वाविशेषेणैव भवतीति प्राप्ते, उच्यते ।

विशेषं च दर्शयति ॥ १७ ॥

श्रुतिरिति शेषः । सा च 'ब्रह्मविदाप्नोति परमिति, नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्य' इति च । एवंच यस्य वरणविशिष्टब्रह्मज्ञानं तस्य परब्रह्मप्राप्तिः, यस्य तु केवलब्रह्मज्ञानं तस्याऽक्षरप्राप्तिरिति विशेषो बोध्यः ॥ १७ ॥

इति श्रीब्रह्मसूत्रवृत्तौ मरीचिकाख्यायां चतुर्थाध्यायस्य तृतीयपादः ॥ ४ ॥ ३ ॥

चतुर्थाध्यायस्य चतुर्थः पादः ।

पूर्वपादान्ते चरणयुक्तब्रह्मविदः पुष्टिमार्गीयस्य परप्राप्तिरुक्ता। तत्र स सायुज्यं प्राप्य भगवदानन्दमनुभवत्युत देहेन्द्रियादिसङ्घातं प्राप्य भेदेनानुभवतीति संशये, न स पुनरावर्तत इति, तेषामिह न पुनरावृत्तिरस्तीति च श्रुतेस्ततो जन्माभावात् सायुज्यं प्राप्यैवानुभवतीति प्राप्ते, उच्यते ।

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

सम्पद्य ब्रह्म प्राप्य स्थितस्य जीवस्य भगवदत्यन्तानुग्रहवशात् तस्य स्वरूपानन्ददित्सायामाविर्भावो, न तु जन्म । सोऽपि स्वेन भगवत्सामर्थ्येन, न तु कर्मादिना । तथाचोक्तश्रुत्योः प्राकृतजन्माभावनिषेधकत्वं, न तु स्वरूपात्मकालौकिकदेहेन्द्रियादिना प्राकट्यनिषेधकत्वम् । कुतः । शब्दात् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेतिश्रुतेरित्यर्थः । भगवता सहानेकविधकामाशनं देहेन्द्रियादिकं विना न सम्भवतीति भगवद्दत्तालौकिकदेहेन्द्रियादिकं प्राप्य तत्स्वरूपानुभवं करोतीत्यर्थः ॥ १ ॥

ननु कामभोगानाममुक्तकर्तृकत्वात् तत्प्रतिपादिका श्रुतिरमुक्तविषयेत्याशङ्क्याह ।

मुक्तप्रतिज्ञानात् ॥ २ ॥

ब्रह्मविदाप्नोति परमित्यनेन मुक्तं प्रतिज्ञाय तद्विचरणं सोऽश्नुते सर्वान् कामानित्यनेन क्रियते । अतो मुक्तप्रतिज्ञानादयं पुष्टिमार्गीयमोक्षरूपत्वं कामाशनस्य, न तु लौकिकत्वमित्यर्थः ॥ २ ॥

ननु कामभोगस्य गुणाधीनत्वात् परब्रह्मणो गुणातीतत्वात्, सह ब्रह्मणेत्यत्र ब्रह्मपदं कार्यब्रह्मपरमिति न तत्प्राप्तेर्मोक्षरूपत्वमित्याशङ्क्याह ।

आत्मा प्रकरणात् ॥ ३ ॥

सह ब्रह्मणेत्यत्र ब्रह्मपदेन आत्मा व्यापको मायागुणसम्ब-

ण्वरहित एवोच्यते। कुतः। प्रकरणात्। ब्रह्मविदाप्नोति परमित्य-स्य गुणातीतप्रतिपादकत्वात् तत्प्रकरण एव सोऽश्नुत इत्यस्य पाठा-त् परं ब्रह्मैवात्र प्रतिपाद्यं, न कार्यं ब्रह्मेत्यर्थः॥ ३॥

ननु ब्रह्मविदाप्नोति परमिति भिन्नं वाक्यं, सोऽश्नुत इयम् ऋग् भिन्ना। अतो नैकं प्रकरणमिति ब्रह्मपदेन प्राकृतगुणसहित-मेवात्रोच्यत इत्याशङ्का परिहरति।

अविभागेन दृष्टत्वात्॥ ४॥

पूर्ववाक्येन सहाविभागेनैवेयम् ऋक् पठिता। कुतः। दृष्ट-त्वात्। तदेषाभ्युक्तेत्यनेन, ब्रह्मविदितिवाक्यैकार्थप्रतिपादकत्वेनैव-र्गुक्तेति दृष्टत्वादित्यर्थः। अतः पूर्वोत्तरवाक्ययोरेकार्थप्रतिपादक-त्वात् परब्रह्मैवात्र प्रतिपाद्यत इति॥ ४॥

मुक्तो जीवो भगवदनुग्रहाद् बहिराविर्भूय गुणातीतेन पुरुषो-त्तमेन सह सर्वकामोपभोगं करोतीति पूर्वमुक्तम्। तत्र बहिरावि-र्भूय प्राकृतेन शरीरेण भुङ्क्ते, किंवाऽप्राकृतेनेति संशये भोगायतनस्य प्राकृतस्यैव दृष्टत्वात् प्राकृतेनैव भुङ्क्त इति प्राप्ते, उच्यते।

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः॥ ५॥

ब्राह्मेण ब्रह्मसम्बन्धिना सच्चिदानन्दात्मकेन शरीरेण, ब्रह्मणा सर्वान् कामानश्नुत इति जैमिनिराचार्यो मन्यते। कुतः। उपन्यासा-दिभ्यः। ब्रह्मविदाप्नोति परमित्युपन्यस्य सोऽश्नुत इतिकथनात्। किञ्च, परप्राप्तेः पुष्टिमार्गीयमोक्षरूपत्वेन लौकिकशरीरेण तद्भोगा-सम्भवाद् अक्षरब्रह्मणः पुरुषोत्तमाधिष्ठानत्वात् तदात्मकशरीरेण भगवदानन्दं भुङ्क्त इति युक्तम्। कर्मवादिनो जैमिनेरप्यत्र सम्म-तिरस्त्यन्येषां किमुतेति सूचनार्थं जैमिनिग्रहणम्॥ ५॥

औडुलोमिस्तु मुक्तो जीवश्चिन्मात्ररूपेणाऽलककरचरणादि-भावं भगवद्विग्रहे प्राप्य भगवदानन्दमनुभवति, न तु पृथग्लौकिक-विग्रहेणेत्याह।

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः॥ ६॥

चिति, स यथा सैन्धवघन इतिश्रुत्युक्तचिद्रूपे ब्रह्मणि तन्मा-

त्रेण चिन्मात्रेण रूपेण कामान् भुङ्क्ते, न त्वलौकिकदेहेन्द्रियादिना। कुतः । तदात्मकत्वात् । जीवस्य तदात्मकत्वादित्यौडुलोमिराचार्यो मन्यते । इत्यथौडुलोमिमते अलौकिकदेहादिकं विनैव चिन्मात्ररूपेणालकादिवद् भगवत्प्राप्तिरेव मोक्ष इति सिद्धम् ॥ ६ ॥

परमाचार्या बादरायणस्त्वौडुलोम्युक्तं चिन्मात्रेणैव जीवस्य भगवत्प्राप्तिर्मोक्ष इत्यत्र चिन्मात्रेणैवेति नियमांशं खण्डयित्वाऽलौकिकदेहेन्द्रियादिभिर्भक्तानां भगवता सह कामाशनं मोक्षो, ज्ञानमिश्रभक्तानां तु चिन्मात्रेणैव रूपेण भगवद्विग्रहेऽलकादिरूपप्राप्तिरेव मोक्ष इति ज्ञानिभक्तशुद्धभक्तव्यवस्थया सिद्धान्तमाह ।

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

परमाचार्यो बादरायणोऽलौकिकविग्रहेणापि भोगेऽविरोधं मनुते । कुतः । एवमप्युपन्यासात् । ब्रह्मविदाप्नोति परमित्यत्रैवमपि विग्रहवत्त्वेनाप्युपन्यासात् । तथाहि । ब्रह्मविदाप्नोतीत्युक्त्वा परप्राप्तौ ब्रह्मविदः स्वातन्त्र्यं बोध्यते । तदेव, ब्रह्मणा सहेत्यृचोपन्यस्तम् । एवञ्च कामभोगेषु ब्रह्मणः साहित्यं भक्तस्य मुख्यत्वमित्युक्तं भवति । तच्चालौकिकविग्रहेणैव समञ्जसं भवति, नान्यथेति युक्तमलौकिकदेहेन्द्रियादिमत्त्वम् । अत्रैवमप्युपन्यासादित्यपिशब्दोक्त्या चिन्मात्रेण रूपेण भगवद्विग्रहेऽलकादिभावप्राप्तिरित्यौडुलोमिमतं ज्ञानमिश्रभक्तविषयमिति सूचितम् । अपिशब्देन तन्मतस्याप्यङ्गीकारसूचनात् । किञ्च, भक्तविविधभावद्रष्ट्रा विविधभोगचतुरेण चेत्यर्थकाधिपश्चितेत्युक्त्याऽलौकिकदेहेन्द्रियादिमत्त्वं प्राप्यते । ननु विग्रहस्य जन्यत्वेन लौकिकत्वाद् ब्रह्मणा सह भोगो न सम्भवतीत्याशङ्क्याह । पूर्वभावादिति । भक्तस्य भगवत्प्राप्तेः पूर्वमेव भगवद्भोगानुकूलविग्रहाद्यभावान्न कृत्रिमत्वमित्यर्थः । एवञ्च भगवत्स्वरूपानन्दानुभवयोग्यशरीराणि नित्यानि सन्ति । येष्वनुगृह्य स्वरूपानन्ददानेच्छा ताञ्जीवांस्तत्र योजयतीतिभावः ॥ ७ ॥

ननु भक्तिमार्गीयेष्वपि कतिपयेषु स्वरूपानन्ददानं, न सर्वेष्वित्यत्र किं नियामकमित्याशङ्क्य तदाह ।

सङ्कल्पादेव च तच्छ्रुतेः ॥ ८ ॥

भजनानन्ददानार्थं सङ्कल्पादेव हेतोस्तद्विषय एव तदानन्दमनुभवति । कुत एतज्ज्ञातं, तदाह । तच्छ्रुतेः । नायमात्मेत्यारभ्य, यमेवैष वृणुते तेन लभ्य इति श्रुतेः । अत्र भगवत्प्राप्तिं प्रति वरणातिरिक्तस्यासाधनत्वोक्त्या वरणमात्रलभ्यत्वोक्त्या च वरणात्मकसङ्कल्पप्राप्यत्वं वदति श्रुतिः । सूत्रे एवकारेण सङ्कल्पातिरिक्तसाधनाप्राप्यत्वं ज्ञाप्यते । चकारात् कृपार्जितफलप्राप्त्यनुकूलपरमार्तिः संगृह्यते ॥ ८ ॥

उक्तमर्थं सूत्रान्तरेण द्रढयति ।

अत एव चानन्याधिपतिः ॥ ९ ॥

येषां साधनं फलं च प्रभुस्वरूपातिरिक्तं नास्ति, तेऽनन्याः । तेषामाधिपतिर्यतः । येषां साधनात्मना फलात्मना च हृदि भगवानेव स्फुरति, नान्यस्तेषामाधिपत्यमपि स्वयमेव करोति । अन्यत्र तु विभूतिरूपैराधिपत्यं करोति, न स्वयम् ॥ ९ ॥

पूर्वमप्रतीकालम्बनान्नयतीतिसूत्रेणाप्रतीकालम्बनानां ज्ञानिनामक्षरप्राप्तिरुक्ता । तत्राक्षरस्य साकारनिराकारभेदेन द्वैरूप्याज्ज्ञानिनां साकाराक्षरप्राप्तिर्निराकाराक्षरप्राप्तिर्वेति संशये निराकाराक्षरप्राप्तिरिति बादरिमतेनाह ।

अभावं बादरिराह ह्येवम् ॥ १० ॥

बादरिराचार्यो मुक्तावस्थायां देहाद्यभावं मनुते । कुतः । आह ह्येवम । यतो ब्रह्मविदो मुक्तिनिरूपिका श्रुतिर्यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदिति निरूपा तस्य द्वितीयज्ञाननिषेधमाह । एवञ्च तस्य कामभोगवार्ता तु दूरे, कामभोगाक्षेप्यदेहस्तु सुतरामेव न सम्भवतीति बादरिमतम् ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिराचार्यो मुक्तस्य पुंसो देहादभावं सत्तां मनुते । ननु पूर्वोक्तबाधकवाक्यानां का गतिरित्याशङ्क्याह । विकल्पामननात् । ब्रह्मविदाप्नोति परमितिश्रुत्या ब्रह्मज्ञानस्य परप्राप्तिहेतुत्वमुक्तम् । ना-

यमात्मेति श्रुत्या वरणैकलभ्यत्वमुक्तम् । सोऽश्नुते सर्वान् कामानितिश्रुत्या फलप्राप्तिर्विवृता । इहैव समवलीयन्ते, ब्रह्मैव सन् ब्रह्माप्येतीत्यपि श्रुत्यन्तरम् । एवञ्च मिथोऽविरोधाय पुष्टिमार्गेऽङ्गीकृतो भगवता सहालौकिकदेहेन्द्रियादिकं प्राप्य कामानश्नुते । ज्ञानमार्गीयस्तु, ब्रह्मैव सन् ब्रह्माप्येतीत्युक्त्याऽक्षरे लयं प्राप्नोतीति व्यवस्थितविरुद्धरूपाश्रयणान्मुक्तस्याप्यलौकिकदेहेन्द्रियादिसत्त्वे बाधकं नास्तीत्यर्थः । तत्केन कं पश्येदित्यपि ब्रह्मज्ञानदशानिरूपणमिति ज्ञेयम् ॥ ११ ॥

जैमिनिमते साकाराक्षरात्मकविग्रहप्राप्तिर्भक्तानां, निराकाराक्षरे लयस्तु ज्ञानिनां मोक्ष इत्युक्तेः साकारनिराकारभेदेनाक्षरे भेदशङ्का स्यात् । तन्निवारणायाचार्य एकमेवाक्षरं जीवानामधिकारभेदेन द्वादशाहवद् द्विरूपेणास्तीत्याह ।

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

भगवता सह, सोऽश्नुत इतिश्रुत्युक्तकामभोगसाधनस्याक्षरस्य भक्तान् प्रति भगवद्रसभोगार्थं शरीररूपेणाविर्भावेन भोगायतनत्वाच्छरीरत्वम् । भक्तदेहेन्द्रियादीनामक्षरात्मकत्वात् । ज्ञानिनां तु भौतिकत्वाभावमात्रेण निराकारत्वेन स्वस्मिंल्लयसम्पादकत्वादशरीरत्वमपीति बादरायण आचार्यो मन्यते । अतः श्रुतेरित्यर्थः । सा तु तस्य ह वा एतस्यैवं पश्यत इत्यारभ्य, आत्मन एवेदं सर्वमित्यन्ता । तेन प्राकृतशरीरराहित्यं सिद्ध्यति । नन्वेकस्यैव विरुद्धमशरीरत्वं शरीरत्वं च कथमित्याशङ्क्य वैदिकदृष्टान्तेन समाधत्ते । द्वादशाहवत् । यः कामयेत प्रजायेयेति, स द्वादशरात्रेण यजेतेति विधानाद् यागत्वम्, द्वादशाहमृद्धिकामा उपेयुः, य एवं विद्वांसः सत्रमुपयन्तीति च विधानात् सत्रत्वं यथा द्वादशाहस्य तथा प्रकृतेऽपि ज्ञेयम् । प्रमाणसिद्धत्वादिति भावः ॥ १२ ॥

ननु श्रीकृष्णाद्यवतारस्वरूपमानन्दमयमेवेति तत्र प्रमाणेषु प्रतिपादितम् । परन्तु तत्राप्यवतारसमकालैः पुरुषैः प्राकृतविग्रहस्याविशेषा दृश्यन्ते । तत् कुत इत्याशङ्क्य परिहरति ।

तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥

तद्दर्शनस्य वास्तवत्वनिरासकस्तु शब्दः । तत्र प्राकृतत्वयाऽवस्थादर्शनम्, अभावे प्राकृतत्वस्याभावे एव भवति, न तु प्राकृत्याऽवस्थाऽत्र सन्ति । नन्वविद्यमानविषयस्य कथं दर्शनं स्यादत आह । सन्ध्यवदिति । सन्ध्य तृतीयस्थानमितिश्रुतेः सन्ध्ये स्वप्ने यथाऽविद्यमानानेव मायिकान् पदार्थान् पश्यति निद्रामोहित एवं ये-ष्वासुरेषु भगवतः स्वरूपाज्ञापनेच्छा तेषु मायया स्वरूपेऽविद्यमाना-नेव धर्मान् भासयतीति नानुपपन्नं किञ्चित् । ते तु, प्रवृत्तिं च निवृ-त्तिं च जना न विदुरासुरा इत्यारभ्य, मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिमित्यन्तेन गीतायामुक्ताः ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥

अप्राकृतलीलापदार्थस्य यत् तत्त्वेन दर्शनं तद् भावे विषयसद्भावे भवति । तद्दर्शनं सविषयकमेव, न तु मायिकाविषयकम् । तत्र दृष्टान्तः । जाग्रद्वत् । जाग्रद्दशासामयिकज्ञानं सत्यविषयकमेव भवति, निद्रामोहितस्य तु विपरीतं, तद्वदित्यर्थः ॥ १४ ॥

ननु सोऽश्नुते सर्वान् कामान् सह ब्रह्मणेत्यत्र भक्तस्य भगवता सह कामभोग उपपादितः । परन्तु भगवतः पूर्णज्ञानक्रियाश-क्तिमत्त्वेन भक्तस्य ततो न्यूनत्वे न सम्भवति । तत्रापि प्राधान्यं सु-तरामेव न सम्भवतीत्याशङ्क्याह ।

प्रदीपवदावेशस्तथाहि दर्शयति ॥ १५ ॥

न हि तदा भक्तस्य स्वसामर्थ्येन प्राधान्येन भगवता सह भोगः, किन्तु भगवदावेशेन । प्रदीपवत् । यथा प्रदीपः स्नेहयुक्तवर्त्य-न्तरे सम्बद्धः स्वेतरामपि स्वसमानां करोति, तथा भगवानपि फल-दानार्थं भक्ते सम्बद्धस्तमपि स्वसमानसामर्थ्यं करोतीत्यर्थः । अत्र प्रमाणमाह । तथाहि दर्शयति । श्रुतिरितिशेषः । सा तु भर्त्रा सह म्रियमाणो विमर्गे, एको देवो बहुधा निविष्ट इति च ॥ १५ ॥

ननु न तद्रश्नाति कश्चन न तदश्नाति कश्चनेति श्रूयते । ब्रह्मणा सह कामभोगोऽपि, सोऽश्नुत इति श्रूयते । एवञ्च श्रुतिविप्रति-षेधनिराकरणाय निर्गुणं ब्रह्म, न तदश्नोतीतिश्रुतेर्विषयः । सोऽश्नुत

इतिश्रुतेस्तु प्राकृतगुणसहितं ब्रह्म विषय इति व्यवस्थायां सवसामञ्जस्यमिति प्राप्ते, उच्यते ।

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥

स्वाप्ययः स्वमपीतो भवतीतिश्रुत्युक्ता सुषुप्तिः । सम्पत्तिर्ब्रह्मसम्पत्तिरूपकरीत्या पुष्टिमार्गीयो मोक्षः । तयोरन्यतरापेक्षमुभयश्रुत्याविष्कृतम्, उक्तार्थमित्यर्थः । एवञ्च प्रस्वापदशायां ब्रह्मस्वरूपस्य सम्यगनुभवाभावात् तद्विषयिणी न तद्वेत्तीति निषेधिका श्रुतिः । सम्पत्त्यात्मकपुष्टिमार्गीयमोक्षे तु स्वरूपस्याऽनेकधाऽनुभवात् तन्निरूपिका, सोऽश्नुत इत्यादिश्रुतिरिति न प्राकृतगुणयुक्तत्वनिर्गुणत्वभेदेन व्यवस्थाकल्पनमुचितमित्यर्थः । परास्य शक्तिर्विविधैव श्रूयत इत्यादिश्रुत्याऽचिन्त्यानन्तशक्तिमति स्वतः सर्वभवनसमर्थे ब्रह्मणि गुणानां प्रयोजनाभावात् ॥ १६ ॥

ननु ब्रह्मणा सह कामभोगे लौकिकव्यापारसाहित्यमस्ति न वेति संशये भोगस्य लौकिकव्यापारसाहित्यदर्शनादस्तीति प्राप्ते, उच्यते ।

जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥

भगवता सह भोगो जगद्व्यापारवर्जं भवति । जगत्सम्बन्धी लौकिको यो व्यापारस्तद्रहित इत्यर्थः । कुतः । प्रकरणाद् असन्निहितत्वाच्च । ब्रह्मविदाप्नोतीत्यत्र मुक्तिप्रकरणस्थत्वात् तत्र लौकिकव्यापारो न सम्भवति । लीलायाः प्रकृतिकालाद्यतीतत्वाच्च लौकिकं जगत् ततो दूरतरमिति न तत्र लौकिकव्यापारसम्भावना सन्निधानाभावात् ॥ १७ ॥

ननु मुक्तिप्रकरण एव छान्दोग्ये, सर्वं ह पश्यतीति सर्वविषयज्ञानकथनात् पूर्वोक्तं लौकिकव्यापाराहित्यं नोपपद्यत इति सूत्रार्थेनाशङ्क्य समाधत्ते ।

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः॥१८॥

देशकालभेदेनानेकविधायां लीलायामधिकृतो यो भक्तस्तस्य यानि तत्तल्लीलानुभवार्थं नानारूपाणि तान्याधिकारिकाणि । तेषां

मण्डले समूहः । तत्र स्थितं वस्तुमात्रमाधिकारिकमण्डलस्थम् । स- र्वस्य सर्वं ह पश्यतीत्यनेन दर्शनोक्तिर्न तु लौकिकवस्तुनः । अत एवात्र, सर्वमाप्नोति सर्वशः, स एकधा भवतीत्यादि च पठ्यते । अतः, सर्वं ह पश्यतीतिश्रुत्याऽप्यलौकिकलीलाविषयकसर्वज्ञानक- थनान्मुक्तिदशायां न लौकिकव्यापारसम्भावनापीति भावः ॥ १८ ॥

ननु तत्तद्देशकालविशिष्टलीलाया नित्यत्वात्, श्वस्त्वद्गृहमा- यास्य इति भगवदुक्तौ भक्तानां तदाकाङ्क्षया स्थितिरनुपपन्ना । तत्तद्दे- शकालभगवदागमनस्य नित्यत्वेन तदापि सत्त्वात् भगवतोऽप्येवं कथनासम्भवाच्चेत्याशङ्क्याह ।

विकारावर्त्ति च तथा हि स्थितिमाह ॥ १९ ॥

अस्मिञ्छास्त्रे । भगवल्लीलायाः प्रकृतित्वेन कथनात् तद्विरु- द्धोऽर्थो विकारशब्दवाच्यो भवति । यथाऽऽम्रादिफलेषु विकारेण रसनाशो भवतीति लोके दृष्टं, तद्वदत्रापि भगवतः श्वस्त्वद्गृहमाया- स्य इति भक्तविशेषं प्रति कथनसमयेऽपि तद्गृहागमनली- लाया नित्यत्वेन तस्मिन् काले सत्त्वेऽपि तदा तस्या अनुभवे भगवदागमनप्रतीक्षाहेतुविप्रयोगरसस्य नाशो भवतीति तस्मिन् का- ले स्वगेहे भगवत्स्थित्यनुभवो विकारो भवति । एवञ्च भक्तानां पूर्वो- क्तरीत्या भगवदुक्त्यनन्तरं यत्तदागमनप्रतीक्षात्मकं ज्ञानं तद् विका- राऽवर्ति भवति । मद्गेहे पूर्वं भगवानागतोऽभूद्, अधुना पुनरप्या- यास्यतीति भूतभविष्यत्स्वगेहस्थित्यनुभवविषयकमपि ज्ञानं न भवति विरहौत्कण्ठ्यानापत्तेः । किन्तु कदा आयास्यतीति केवलं प्रतीक्षैव तदा भवति । इदं सङ्क्षेपत उक्तम् । यद्रसनाशकं भवति तादृशं ज्ञानं तस्य न भवति, पोषकमेव भवतीति लौकिकभिन्नं लीलानुभवा- त्मकमेव तज्ज्ञानम् । एवञ्च तल्लीलाविशिष्टधर्माः सर्वदा तद्गेहे सत्त्वेऽ- ऽपि तदा तस्य ज्ञानं न भवतीत्यर्थः । भक्तानामपि सर्वज्ञत्वेऽपि यादृशं रसाभासजनकं तादृशमाच्छाद्य रसपोषकं ज्ञानं प्रकटयति । अत्र प्रमाणं प्रदर्शयति । तथा हि स्थितिमाह । सर्वमाप्नोति सर्वश इति श्रुतिरेकस्यैव भक्तस्य सर्वशः सर्वैः प्रकारैः सर्वं लीलारसमाप्नोतीति कथयन्ती पूर्वोक्तरीत्यैव तस्य लीलायां स्थितिमाह । अतो लीला

स्वरूपमेवेदमलौकिकं तादृशमिति वैदिकैस्तथैव मन्तव्यमिति भावः। अलौकिकेऽर्थे प्रमाणमेवानुसर्तव्यं, न लौकिकी युक्तिः ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

प्रत्यक्षानुमाने श्रुतिस्मृती भगवत्सम्बन्धिनि लीलापदार्थे युक्त्यगम्यत्वं दर्शयतः । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च । नैषा तर्केण मतिरापनेया । अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदिति च । अतो लीलायां लौकिकयुक्तिविरोधो न दूषणं, प्रत्युत भूषणमेव । तदुक्तं, न हि विरोध उभयं भगवत्यपरिगणितगुणगणे ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाशयदुरवग्रहवादिनां विवादानवसर इत्यादि ॥ २० ॥

एतादृशलीलाविशिष्टप्रभुस्वरूपमेव परमफलत्वेन वेदान्तश्रुतितात्पर्यविषय इति सूचयति ।

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

सोऽश्नुते सर्वान् कामान् सह ब्रह्मणेतिश्रुतौ भोगे भगवतो भक्तसाम्यमुच्यते । एतच्च पुरुषोत्तम एव सम्भवति । यतो भक्ते सख्यं दत्त्वा तत्कृतात्मनिवेदनमङ्गीकुर्वन् कृपया तं प्राधान्येन स्वरूपानन्दमनुभावयति । अन्यथा भक्तस्य स्वरूपानन्दानुभवो न भवेत्। एतादृशपरमकृपालुः पुरुषोत्तम एव परमं फलमिति सिद्धम् । मात्रपदेन न तत्समश्चाभ्यधिकश्च दृश्यत इतिश्रुतेर्भगवतः सर्वात्मना न भक्तसाम्यमिति ज्ञापितम् ॥ २१ ॥

एवं भगवत्स्वरूपानुभवस्य पुष्टिमार्गीयपरमफलत्वं निरूप्याक्षरप्राप्तिरूपस्य ज्ञानिनः फलत्वं निरूप्य तदनुभवानन्तरं कर्ममार्गवत् पुनरावृत्तिः स्यादित्याशङ्कोभयोरप्यपुनरावृत्तिं सूत्रावृत्त्या निरूपयन्नुपसंहरति ।

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

अत्र सूत्रावृत्त्या ज्ञानिनां भक्तानां चानावृत्तिरुच्यते । ब्रह्म-

लोकमभिसम्पद्यते, न स पुनरावर्तत इत्यादिशब्दस्तु ज्ञानिनामनावृत्तिमाह। भक्तिमार्गे तु यमेवैष वृणुते तेन लभ्य इतिश्रुतवर्णनस्य नित्यत्वनानावृत्तिरपि नित्या बोध्या। किञ्च, कालेन हि पुनरावृत्ति। न यत्र कालोऽनिमिषां पर प्रभुरितिवाक्याद् भगवल्लीलायां कालप्रभावादपि न पुनरावृत्तिरिति ॥ २२ ॥

सम्राट्श्रीजयसिंहाज्ञां प्राप्य व्रजनाथभट्टेन ।
अणुभाष्यभास्करस्य मरीचिकेयं कृता जयतात् ॥ १ ॥

इति श्रीब्रह्मसूत्राणामणुभाष्यानुसारिवृत्तौ मरीचिकाख्यायां
चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥

समाप्तोऽयं चतुर्थोऽध्यायः ॥
सम्पूर्णश्चायं ग्रन्थः

॥ श्रीहरिः ॥

अयि, श्रीश्रीवल्लभाचार्यशुद्धाद्वैतसम्प्रदायसिद्धान्तज्ञानरसिकाः सहृदयवराः !, इदं किलाभिज्ञायतां तत्रभवद्भिर्भवद्भिः ।

यदेषा श्रीभगवत्कृष्णद्वैपायनप्रणीतब्रह्मसूत्राणां विवृतिरणुभाष्यानुसारिणी मरीचिकाख्या श्रीव्रजनाथभट्टकृता सम्मुद्र्य प्रकाशिता वरीवर्ति ।

एनां च, 'नानामतध्वान्तविनाशनक्षमो वेदान्तसिद्धान्तविकासने पटुः । आविष्कृतोऽयं भुवि भाष्यभास्करो मुधा बुधा धावत नान्यवर्त्मसु' इत्यणुभाष्ये श्रीश्रीवल्लभाचार्यैः स्वभाष्यस्य भास्कररूपतया निरूपणाद् अणुभाष्यविभाकरानुगामिकिरणरूपेण व्यपदिशन् मरीचिकेति न्यरुपयद् ग्रन्थकारः ।

स च, शुद्धाद्वैतसम्प्रदायस्य सौलभ्येन बोधार्थमेनां सम्राट्श्रीजयसिंहाज्ञानुसारेण व्यरचयदिति, 'सम्राट्श्रीजयसिंहाज्ञां प्राप्य व्रजनाथभट्टेन । अणुभाष्यभास्करस्य मरीचिकेयं कृता जयताद्' इति प्रशस्तिलेखाज्ज्ञायते ।

तां चैनां नानाविधदर्शनप्रकाशाय प्रयतमानेन श्रीहरिदासगुप्ताभिधमहाशयेन प्रवर्तितो भाष्यादिभिः संशोध्य प्रकाशितवानस्मि ।

अग्रे च क्रमशः सप्रकाशाख्यव्याख्योऽणुभाष्यग्रन्थोऽपि प्रकाशयिष्यत इति शुद्धाद्वैतसम्प्रदायपुस्तकमभिलष्यद्भिः सुधीभिरवधेयमिति, प्रकाशयिता ।

रत्नगोपालभट्टः